श्री०

Vedanta vivaranakhedkaro
Pammonil Kanthasya

वेदांतविवरणंखेडकरो पुंमोनी ळ केठस्य।।

33/4 

458

2400

॥ ॥श्रीगणेशाय नमः॥ ॥पालने निर्मलसत्ववृत्तये यस्य कर्मणि रजोत्तुषे लये॥ तामसाय जगतः परात्परं दैव
ज्ञाल वपुषे नमः स ते॥१॥ यस्याः प्रसादमवलंब्य जगद्गुरूणामप्यस्खलद्वच्कगुणाः प्रसरंति वाचः। मा वेद
शास्त्रपथि निर्मितकंठदेहा भूयात्समग्रवरदैव सरस्वती नः॥२॥ विघ्नाभितापमपहत्य मदीयकल्पबीजं प्र
द्रुमदत्तुग्रहवर्षपातैः। संप्रार्थितः सितमरोपगणेशमेघः सिंचन्नितीष्टफलमंकुरयत्वनोपं॥३॥ यस्यामोपिथ
निकमलावबोधरागः शांतः सन्नुपतितमो विनाशमेतः। रीत्नं पत्रथयपतियोपि गोसहस्त्रैस्तं व्यासं रविमतजं
गत्स्वर्भानु॥४॥ उद्धृत्य सर्ववेदपयसः कमलाभिराद्भे वालिंगिता खिलजगत्त्रभवे क्रमेण निविद्यामशेषजग
तां पुरुषदामनघस्तु शंकरं विमलमाप्यकृतेनमामि॥५॥ वेदैतमात्मसंभूद्धस्फुरद्धात्मावबोधतः अर्पतोस्मि
तामस्मै वपोनत्वा तं भवेगुरू॥६॥ प्रकाशगत्मायतिः सम्यक्कृत्वा मविद्याप्नुभुत्स्यया। यथाबुद्धं यथाशक्ति व्या
ख्यास्ये पंचपादिकां॥७॥ विदितसकलवेद्यैर्न प्रशस्तं निलोके प्रथितगापि महद्भिः किंपुनर्मादृशैरिति विफलं एम
समेस्मिन्व्याख्येयेहं प्रवृत्तः स्वमतिविमलतायेज्ञं तुमर्हेति संततः प्रारिप्सितस्य ग्रंथस्याविघ्नेन परिसमाप्ति १

न

प्रचयगमनाय शिष्टाचारपरिपालनाय चाभिलषितदेवतागुरुनमस्कारः कर्तव्यः। शास्त्रार्थश्च तत्त्वंपदा
र्थविवेकोपायलभ्यः प्रत्यग्ब्रह्मणोरेकत्वलक्षणः संक्षेपतो दर्शनीयः। कृत्स्नस्य भाष्यस्य तत्तात्पर्यकथना
येति तदुभयं श्लोकसमर्थाभ्यां संक्षेपतो दर्शयति। अनाद्यानंदकूटस्थज्ञानानंतसदात्मने। अभूतद्वैतजालाय
साक्षिणे ब्रह्मणे नमः इति। कृत्स्नस्य भाष्यस्य ब्रह्मात्मैकत्वे तात्पर्यमत्र दर्शितमुत्तरत्र। विभक्तस्तात्पर्यदर्शनात
द्देवतागुरुविषयाज्ञानमस्कारा इष्टपदं हितामतिवक्तुः फलप्रयोजनं संपादितमपि श्लोकेनणामषिविद्यां
भावप्रतिपद्यतइति वाङ्मनःकायप्रणिधानैर्गुरूनभिरजयति। नमः श्रुतिशिरःपद्मषंडमार्त्तंडमूर्त्तये इ
त्यादिभिस्त्रिभिः श्लोकैः। पदार्थमुद्दिश्य मेभावप्रतिपद्यताम् इति वाङ्मनःकायप्रणिधानैर्गुरूनभिप्रजयति। न
मःश्रुतिशिरःपद्मषंडमंगलाचरणं संपादितं तन्निर्दिशयति।। यदादिकं तद्भारेणेति।। ननु नेदं भाष्यं व्याख्यान
पदवीमुपारोहति भाष्यलक्षणाभावात्। सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः।। स्वपदानि च वर्ण्यं
ते भाष्यं भाष्यविदो विदुरिति भाष्यलक्षणं वदंति। तत्रापि अथातो ब्रह्मजिज्ञासेति सूत्रे अनुवादपरिहाराय शास्त्रे

वि०र०ण

पुरुषप्रवृत्तिसिद्धये च कर्तव्येति पदमध्याहर्तव्यं। तत्र जिज्ञासापदेनान्तर्णीतविचारस्योपलक्षणात् अनुष्ठानयोग्यं साधनचतु
ष्टयसंपन्नस्य ब्रह्मज्ञानाय विचारः कर्तव्य इति सूत्रवाक्यस्य श्रौतोर्थः संपद्यते। अर्थादधिकारिविशेषणेन मोक्षसा
धनं ब्रह्मज्ञानमिति सिध्यति। सन्निधानाच्च वेदान्तवाक्यविचार इति। कृत्स्नार्थाभ्यां साधनचतुष्टयसंपन्नस्य मोक्षसा
धनब्रह्मज्ञानाय वेदान्तवाक्यविचारः कर्तव्य इति सूत्रवाक्यस्य तात्पर्येण प्रतिपाद्योर्थो वृत्तः। अत्रेदं भाष्यस्य
त्वार्थकलामपि प्रतिपादयतीत्यतो न व्याख्यानार्हमित्येतत् शंकितं दोषं परिहरन् भाष्यखंडस्य सूत्रेणार्थादु
पात्तविषयप्रयोजनप्रतिपादनेन तात्पर्यं प्रदर्शयति। युष्मदस्मत्प्रत्ययगोचरयोरित्याद्यहमिदं ममेदमिति नैसर्गि
कोयं लोकव्यवहार इत्यन्तेन भाष्येण अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इत्यन्ते
न भाष्येण पर्यवस्यच्छास्त्रस्य विषयः प्रयोजनं चार्थात् अथ सूत्रेण सूचिते इति प्रतिपादयतीति। तत्र नैसर्गिको
यं लोकव्यवहार इत्यन्तेन भाष्यमिति ग्रंथः शास्त्रस्य विषयः प्रयोजनं च प्रतिपादयतीत्यत्रान्वयेन संबध्यते। ननु कथं
भाष्य इयमेव विषयप्रयोजने प्रतिपादयतीति शास्त्रारंभनिमित्तविषयप्रयोजनसिद्धिहेतोरध्यासस्योपपादक राम २

त्वादिति ब्रूमः। हेतुवचनं हि प्रतिज्ञातार्थमेव साधयति तथा चैतच्छास्त्रमारंभणीयं संभावितविषयप्रयोजनवत्त्वात्तद्व
च्चाद्यारंभवत् शास्त्रं च संभावितविषयप्रयोजनमविद्यात्मकबंधप्रत्यनीकत्वात् जाग्रद्बोधवदिति। तदेवं शास्त्रस्या
रंभनिमित्तं विषयप्रयोजनवत्त्वे प्रत्यनीकस्य बंधस्याविद्यात्मकत्वं निर्दिशद्भाष्यं द्वयं विषयप्रयोजने प्रतिपादयती
ति। ननु बंधस्याविद्यात्मकत्वलक्षणो हेतुरसिद्धः। कथमसिद्धमसिद्धेन साध्यतइत्यतआह। सर्वे वेदांता आरभ्यंत
इत्यनेन भाष्येण पर्यवस्यदिति। विषयादिसिद्धिहेतोरध्यासस्य सिद्धिहेतुभूता निलक्षणसंभावनासद्भावप्र
माणानि प्रतिपादयता भाष्येण सहलक्षणादिभिः स्वार्थमध्यासं साधयित्वा विषयप्रयोजने साधयतास्यर्थः।
सैतएवअवधानात्म्य बंधानाम्यां विषयादेः साधकत्वादेतदंतमनन पर्यवस्यदिति भाष्यस्यातिभागेनोपादानं कृ
ते ननु तर्हि सर्वलोकप्रत्यक्षइत्यनेन पर्यवस्यदिति वक्तव्यं आसमाप्तेस्तथा हेतोरिति भाष्यस्य विषयप्रतियोजन
यो वेदांतवाक्यसंबंधकथनद्वारेण विचारशास्त्रसंबंधप्रतिपादनपरत्वात् विचारशास्त्रीयविषयप्रयोजनसा
धनेसमवधानवत्साम्येन पूर्वभाष्येण महोपादानं कृतं। नन्वेवमप्यसूत्रसंबंधिनी विषयप्रयोजने किमिति

प्रतिपाद्यतेऽस्मिन्नस्तीह। विषयः प्रयोजनं चार्थात्प्रथमसूत्रेण सूचिते इति ति इतिशब्दो हेतौ। यस्मात्प्रथम
सूत्रेणार्थात्सूचितं तस्मात्प्रतिपादयतीति। कः पुनरस्य सूत्रस्य प्रसंग इति॥ उच्यते। नित्यनैवाध्ययनेन विधिनाधी
तस्वाध्यायो वेदान्तवाक्येष्वापातदर्शनेनेदमवगच्छति। आत्मनस्तु कामाय सर्वं प्रियं भवति आत्मप्रकृगात्सर्वतो विरक्त
स्यात्मप्रेयमेवात्मनि विदिते सर्वमिदं विज्ञातमेतावदरे खल्वमृतत्वमित्युपसंहारश्रवणात्साधनमात्मदर्शन
द्रष्टव्य इत्यन्वयव्यतिरेकाभ्यां मनननिदिध्यासनाभ्यां फलोपकार्यंगाभ्यां सहश्रवणं नामांगि विधीयते इति सर्व
त्र किमद्विशेषणपर्यन्तोधिकारी किंप्रमाणकं कस्य कोवाम्नौ वेदान्तवाक्यविचारो भवति। प्राप्तः। ज्ञासो वा कथं वा
त्मज्ञानं मोक्षसाधनं किंप्रमाणकं वा किं वा वेदान्तवाक्यं किंप्रमाणं चेति जिज्ञासते तं च जिज्ञासुं पुरुषार्थकाममु
पलभमानो भगवान्बादरायणः साधनचतुष्टयसंपन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारं विदधतो राम
विधेरपेक्षिताधिकारिविषयफलानुबंधप्रथमागमिकमविप्राप्येन निर्णेतुं सूत्रयामास अथातो ब्रह्मजिज्ञासेति। ३
अतिसूत्रयोरेकवाक्यतावगमात्तमनननिदिध्यासनयोश्च श्रवणांगत्वमुक्तं तात्पर्यसामः। नतु प्रोक्तं इति विशिष्टमोक्षे

साधनंब्रह्मात्मज्ञानायवेदांतवाक्यविचारंसाधनचतुष्टयसंपन्नस्यविधातुंनशक्नोति। श्रवणादीनांविषयावगमप्र
त्ययव्यतिरेकसिद्धसाधनत्वात्। नचावघातादिवदुभयार्थतासंभवति। दृष्टादृष्टप्रकारद्वयसाध्यापूर्ववदिहादृष्टसा
ध्यस्याभावात्। आत्मावगमस्यदृष्टेनोपायमात्रसाध्यत्वादिति॥ नैतत्सारं। आत्मतत्त्वापरोक्षस्यसर्वादृष्टसाध्यत्वस्यव
क्ष्यमाणत्वादवघातादिवदुभयार्थतयाधानोपपत्तेः। ननुविधिपरत्वेवेदांतानांतन्निष्ठतयाब्रह्मस्वरूपस्यासिद्ध्यादि
दोषप्रसंगान्नास्तिश्रवणादिविधानमितिभाष्यकारैरुपदर्शितं। सत्यंज्ञानविधिस्तत्रनिराकृतोनश्रवणादिविधिः।
तत्रोक्तदोषप्रसंगाभावात्। कथंदर्शनविधानेहिब्रह्मकर्मतयागुणभूतंप्रसज्यते। ब्रह्मदर्शनमुद्दिश्यविचारविधाने
तुस्वप्रधानफलभूतदर्शनविशेषणतयाब्रह्मापिचस्वप्रयोजनंभवतीतिनगुणभूतमितिवेदांतेषुब्रह्मणिस्वप्रधानेप्र
तिपाद्यमानेतद्दर्शनायश्रवणादिविधानेनविरुध्यते। नन्वेवमप्युपक्रमोपसंहारासामेक्यं। सिद्धात्मप्रतिपादनप
रैर्वाक्यैःकथमवांतरवाक्यैःश्रवणादिविधानंकल्प्यतइति। अवांतरवाक्यभेदेनविविदिषंतीतियज्ञादीनांज्ञानसं
योगविधानवदुपरिहिदेवेभ्यइत्युपरिधारणविधानवन्मलवद्वाससाव्रतकलापविधानवच्चेतिब्रूमः। अथवातस्माद्ब्रा

ष्यणः फलवति विधित्वादिवाक्यं श्रवणादिविधायकमस्ति तस्य तत्परत्वात् सूत्रकारेण वक्ष्यमाणत्वात्सर्वथा तावन्मनन
निदिध्यासनाभ्यामन्तर्भूताभ्यां सह श्रवणविधानमस्त्येवेत्यत्र तत्संदेहे द्वितीयानुबंधस्तत्रैव तत्रैव निर्णयाय तस्य पूर्वसूत्रमारंभणीयं क
त्तव्ये वासिकादिरूपो मोक्षसाधनब्रह्मात्मज्ञानाय वेदान्तवाक्यविचारः प्रथमसूत्रेण प्रतिपादितः। स च कर्त्तव्यो विचारो ज
न्मादिसूत्रमारभ्य प्रवर्तिष्यत इति। तत्र विषये द्वितीये बुद्धिः अधिकारि विषय फलानुबंधे तु विषय फलयोरुपपादनाय वेदान्त
स्यामिथ्यात्वमत्र वर्ण्यत इति सूत्रसंगतमेवेदं भाष्यं व्याख्येयमिति॥ ननु यद्यपि तत्र विषयप्रयोजने सूचिते तर्हि भाष्य
कारेण सूत्रस्य तत्र व्यापारं दर्शयित्वा। ते प समाधानपूर्वकं साक्षादेव प्रतिपादनीये विषयप्रयोजने ऽध्यासस्य सूत्रकार
भाष्यकारयोस्तत्र तात्पर्यमावप्रसंगादिति तत्राह। एतदुक्तं स्याद् ब्रह्मजिज्ञासितमभिमतादिभाष्येऽसाक्षात्तु तत्र भाष्यकारे
णोक्तमिति प्रतिपादयिष्याम इत्यध्याहारः। प्रथमग्रंथोक्तमेवार्थमालेपसमाधानपूर्वकमतितरां स्पष्टीकर्तुं चोद एम
यति। अत्राह पर एवमिति तत्वस्यानर्थहेतोरिति भाष्यमद्रूस्यध्याहारः। प्रथमग्रंथोक्तमेवार्थमालेपसमाधानपू ४
र्वकमतितरां स्पष्टीकर्तुं चोदयति। अत्राह पर एवमिति। तत्वस्यानर्थहेतोरिति भाष्यवत्पूर्वभाष्यमपि विषयादि

क्रमेव प्रतिपादयति। कुतस्तत्रपर्यनुयोगइतिनेत्याहः हंमनुष्यइतिदेहेंद्रियादिष्वित्यादिना। अत्रविचारकर्तव्यता
विषयप्रयोजनाभ्यामानंतर्येणपूर्वपूर्वस्यसाध्यत्वस्यसत्वेऽपिवस्तुविचारत्वाच्चाध्यासमाधनद्वारेणविषय
प्रयोजनेसाधयित्वाविचारकर्तव्यतासाधनीयेतिक्रमनियमंविवक्षन्नाह। उच्यतइत्यारभ्यवक्ष्यतिचैवदित्यंतः
प्राक्तनेनग्रंथेन। ननुब्रह्मज्ञानप्रयोजनंविचारकर्तव्यतांसत्त्वप्रमात्वेनकथंबंधनिवृत्तिर्विचारविज्ञानयोः
प्रयोजनत्वेनसूत्रितेति। अत्राह। ब्रह्मज्ञानंहिसूत्रितंयत्= अनर्थहेतुनिबर्हणमितिविचारसाध्यज्ञानस्यप्रयो
जनमाकांक्षतविचारविधिरधिकारिविशेषणंमोक्षंप्रयोजनत्वेनप्रमिमीतइत्यर्थः। नन्वनर्थोनरकपाना
दिलक्षणोममएवशरीरःहिपातिभासस्यैस्यावाभिथ्यावसाध्यतइति। किंकेनसंगतमितिनेत्याहानर्थस्य
अमात्प्रभृतिकर्तृत्वभोक्तृत्वमितिनिवर्त्ततांतर्हिज्ञानेनवस्तुभूतमेवप्रमातृत्वभोक्तृत्वमितिनेत्या
ह। नतद्वदिवस्तुकृतमिति। तथादिव्यपद्यपिनितीलविशिष्टइवज्ञानस्वविषयस्स मैवेतद्धारमादिकं
विरोधिनंवाप्यतिमादिगुणंननिवर्त्तयतिवविषयामवबोधरवकेवलानेननिवर्त्तते। स्वाश्रयगमंवस्तुज्ञाने

नतिवर्त्तेतेऽहंगिविनच्चवादिज्ञानेनात्मगतधर्माधर्मादिगुणानिवृत्तेर्नवात्मविषयोभयसंबंधिवस्तुज्ञानेन
निवर्त्तते। आत्मनःशरीरविषयज्ञानेनदेहात्मसंबंधाद्यनिवृत्तेरिति। ननुनदृष्टसामर्थ्यात्तज्ज्ञानाद्बंधनिवृत्ति
मेनाविद्यात्मकत्वंवर्ण्येन। किंत्वागमएवज्ञानाद्बंधनिवृत्तिमावयति। ननुश्रुतोपपत्त्यर्थमेवबंधस्याविद्या
त्मकत्वंवर्णनीयमेव। यथाश्येनाग्नेयादीनांषण्णांयागानामधिकारात्सर्वविषयतयासर्वकरणभावेश्रुतेपिकाला
न्तरभाविविषयानात्सर्वसाधनत्वोपपत्त्यर्थंक्रमताविपाककर्मजन्यानिमध्यवर्तीन्यवांतरापूर्वाणिकल्प्यन्ते
यथावाश्रुतस्यैवस्वर्गसाधनत्वस्योपपत्तयेपूर्वंकल्प्यतेतद्वच्छास्त्रमुपोद्घातः। प्रतिपाद्यंवहिरेवप्रतिज्ञाय
पश्चात्तत्सिद्धयेहेतूपवर्णनप्रतिपादनमिति। ननुतत्रक्षणिकानांकर्मणांकालान्तरवर्त्तिफलसाधनत्वाभाव
स्यान्तिनीयमा॰लोकेवेदेपस्वर्गापूर्वसिद्धोमध्येपूर्वाणिकल्प्यंतेश्रुतोपपत्तयइतितर्हिइहापिव्याप्तिनि
यतिरस्तीत्याह। यतोज्ञानमज्ञानस्यैवनिवर्त्तकमितिश्रुतःस्वतस्यैवबंधस्याविद्यात्मकत्वेव्यापारात्तत्सूत्रार्थवि रा॰म ५
चारकर्त्तव्यतोपपत्त्यर्थंप्रयोजनसाधनतापाध्यासोवर्णनीयइत्याह॥ तद्यदीमादिनासूत्रार्थोपपत्त्युपयोगित

पितं तेन ग्रंथेनानन्तुश्च सूत्रेण प्रथमप्रतिपन्नं प्रतिपाद्यमर्थमुल्लंघ्य किमिति चरमप्रतिपन्नमार्थिकार्थमेव भाष्य
कारः प्रथमं वर्णयतीति तत्राह। सकलतंत्रोपोद्घातमिति। प्रतिपाद्यार्थबुद्धौ संगृह्य प्रागेव तदर्थमर्थांतरवर्णनमु
पोद्घातः प्रतिपाद्यबहिरेव प्रतिज्ञाय पश्चात्तत्सिद्ध्यर्थे हेतूपवर्णनं प्रतिपादनमिति विभागः। तंत्रमिति तत्रार्थो ब्रह्मा
त्मैकत्वमुच्यते। ननु भवतु प्रयोजनसिद्धिहेतुरध्यासः कथं तत्रार्थसिद्धिहेतुरित्याशंकां तत्कथनायत्तं तंत्रार्थं प्रथमेक
थयति तथा चास्य शास्त्रस्येति। ऐदंपर्यं प्रतिपादितमित्यतरेण संबंधः। तदेवैदंपर्यं दर्शयति। सुखैकतानेत्यादिनानु
पमर्थः ब्रह्मात्मैकत्वे वेदांताः पर्यवस्यंतीति। यदिदं वेदांतशास्त्रस्यैदंपर्यं तत्सूत्रभाष्याभ्यां प्रतिपादितमिति तत्रार्थप्र
दर्शितस्याध्याससिद्ध्यधीनतयाध्यासस्य प्रथमं वर्णनीयतां दर्शयति। तत्राहं कर्ता सुखदुःखीति॥ ननु शास्त्रमेव
प्रसन्नाभिमतमविद्वत्सुमाभासीकृत्य ब्रह्मात्मैकत्वं प्रतिपादयिष्यति किं श्रुत्यध्यासवर्णनेनेति तत्राह तावत्तुरङ्गवा
दिवदिति। ननु शास्त्रार्थसिद्धिरध्यासपराधीना चेत्स एव तर्ह्यध्यासः सूत्रकारेणामुखतो वर्णनीयः। तस्याप्राधान्या
त्तत्रुस्था तत्रातात्पर्यप्रसंगादिति तत्राह। वक्ष्यतिचेतदिति तर्ह्युपोद्घातत्वात्प्रथममेवाध्यासविषयं सूत्रं प्रणेतव्य

मिति चोदयति यद्येवमिति। अर्थनिर्णयप्रधानत्वाद्वाक्यस्य लक्षणायां प्रतिपादनप्रक्रियायां प्रवृत्तः सूत्रकारो नोपेक्ष्य
नप्रक्रियायामिति परिहरति मेवमर्थविशेषोपपत्तेरिति। तर्हि भाष्यकारेणापि यथासूत्रक्रमेण मेवप्रवर्त्तितव्यं ननु सू
त्रमतिलंघ्येति। तत्राह भाष्यकार इति निःसूत्रप्रतिपन्नार्थप्रतिपादनस्याभावायेत्यर्थः। एवमपि तस्याद्येयमिदं भाष्यं शास्त्रा
दौ मंगलाचरणाभावात्। विघ्नोपसंसृष्टतया शास्त्रार्थप्रतिपत्त्यप्रतिपत्तिविप्रतिपत्तिसंभवात् शिष्टाचारपरिपा
लनहीनतया वा नाप्रणीतत्वप्रसंगादिति वादयति। ननु ग्रंथकरणादिकार्यारंभ इति। ननु शिष्टानाचष्टी विनादि प्र
वृत्तिः किमन्येनानुसरणीयेति तत्राह। शिष्टाचारश्चानः प्रमाणमिति आचारो धर्म इत्येवानुष्ठीमानं कर्म प्रमाणं कर्त्त
व्यमित्यर्थः। ननु प्रयोजनाभावात् किं मंगलाचरणेनेति तत्राह। प्रसिद्धं च मंगलाचारणस्येति। नन्वद्रव्यं सद्रूपादस्प
र्शस्पर्शानुपलक्षितद्रव्यं सर्वस्पर्शहीनं तमः किं तस्यात्। सवितृकिरणसंततेवदेशे प्रदीपालोकस्य जन्मविनाशयोः प्रा
ग्भावप्रध्वंसाभावेतराभावेषु तमोबुद्ध्यदर्शनात् आलोकाभावमात्रं तमः सर्वालोकाभावश्चेत्सर्वालोकासंनि एम
धाने नहि नमिवर्त्ते। बहलांधकारसत्त्वापवरकांतरवस्थितस्यापुरुषस्यापि वहीरूपदर्शनेन सह अपवरकांतस्तमो ६

त्र विघ्न एव नास्त्यल्पारंभत्वादिति नेत्याह। महतीति चेति॥ ननु संभावनामात्रान्न प्रवृत्तिर्विघ्नोपशांतये किं तु निश्चयादि
त्यत आह। प्रसिद्धं चेति ननु लोकप्रसिद्धिर्निर्मूला न विघ्ननिश्चये हेतुरित्यत आह विज्ञायते चेति। उपसंहरति। तत्कथ
मिति। सर्वदा सर्वकार्येषु नास्ति तेषाममंगलं। येषां हृदिस्थो भगवान्मंगलायतनो हरिरिति स्मृतेः शिष्टाचारपरि
पालनाय विघ्नोपशांतये च विशिष्टदेवतानुस्मरणलक्षणं मंगलाचरणं कृतमित्याह। आचोच्यत इति। किं तत्र प्रमा
णमित्यत आह। पुष्पदंतस्य हिंसादिकृत्यमेव नाष्टं प्रमाणमित्यर्थः। मंगलाचरणं वा कथमिदं विशिष्टदेवतानुस्म
रणं गमयतीति तत्राह। स्पाचापमर्थ इति। ननु नेह विशुद्धात्मतत्त्वदेवतानुस्मर्यते किं त्वध्यासाभावो वर्ण्यत इति
सत्यं तादृश्येन तत्त्वमप्यनुस्मर्यत इत्याह॥ तत्कथं चेनेति। न त्वन्यपरत्वाद्देवतानुस्मृतिरविवक्षितानकार्यकरी
ति नेत्याह॥ तदन्यपरादेवेति। अन्यार्थमपि देवतानुस्मरणस्वभावादेव विघ्नोपप्लवं क्षपयति। ध्मार्थ इव वाक्कित्तण
दिकमित्यभिप्रायः। आक्षेपं तत्प्रतिपादितमुपसंहरतीति तस्मादिति। अन्यार्थप्रवृत्तेन पुष्पदंतस्य हिंसादिपदद्वय
मर्थाद्व्याख्यातमुत्तरपदं व्याख्यातुं भाष्यमादत्ते। विषयित्वेऽस्मादिना। तत्र द्विविधो विरोधो द्विविधा चेतरेतरभा

वानुपपत्तिः कथंद्वयोःपदार्थयोरेकदेशकालावस्थानसामर्थ्याभावःपदार्थधर्मोविरोधस्तन्निमित्तोवस्थानलक्षण
कार्याभावस्त्वितरेतराभावानुपपत्तिरितिकेचः संक्षेपः।अपरस्तुपदार्थयोरितरेतरात्मतासामर्थ्याभावःपदार्थधर्मोविरो
धःतन्निमित्तश्चेतरेतरात्मतालक्षणकार्याभावोनुपपत्तिरित्यतोद्वैविध्यात्स्वेच्छेतिकोयंविरोधइत्यादिनातत्रप्रथमं
पक्षेदूषयतियदितावदित्यादिनासहावस्थानमुक्तंवेदितव्यमित्यनेनग्रंथेन।तत्रतमःप्रकाशशब्दाभ्यांछायातप
शीतोष्णग्रहणंसंगीकृत्यतत्रापिसहावस्थानमुक्तमितिद्रष्टव्यं।इदानींद्वितीयंपक्षमवलंबते।उच्यतेपरस्परात्मता
लक्षणइत्यादिना।ननुतमोनामालोकाभावमात्रमितिकेचित्तद्रूपदर्शनाभावमात्रमित्यन्ये।तत्कथंदृग्द्रूपयोर्भा
वरूपयोरिदंदृष्टांतत्वेनोपादीयतइत्युच्यते।उपचयापचयाद्यवस्थाभेदविशेषविशिष्टंरूपवत्तयाचोपलभ्यमानंतमः
कथंद्रव्यमभावविधामासीदेतवहलालोकविततेपिदेशेनिमीलितनयनस्यगोलकांतर्वर्त्तितमोदर्शनमंधकारोपल
ब्धिःपिहितकर्णपुटस्यांतरशब्दोपलब्धिवन्नविरुध्यते।आलोकविनाशितस्यचतमसःपुनर्लक्षणकारणादेवस्थितिमहाति तम
घटादिजन्मवज्जन्मसिध्यति।ननुरूपवतोद्रव्यस्यस्पर्शवत्वनियमात्ततउहितंतमःकथंरूपवद्द्रव्यमवगम्येत।नैषदोषः। ७
वायोरप्रत्रस्पर्शवद्द्रव्यस्यरूपवत्वानियमेपिरूपरहितस्यस्पर्शवतोवायोरप्रत्यक्षप्रमात्रद्दर्शननियमोदेवस्पर्शहीनस्यरूप

वैन्नमसः सिद्धेः। धूमस्य च रूपस्पर्शवता
दर्शनान्नरूपदर्शनाभावमात्रेण तमसि इत्यलमतिप्रसंगेन। न तु द्रव्ययोरितरेतराभावानुपपत्तिः तयोर्विरुद्धमि नि
त्ततादात्म्यावभासेन निरूपणाद्धि शुक्तिरजतयोरपि स्थिता सादात्म्यं हि नयोरेव विभ्रमनिमित्तत्वेनाधिकरणमवभा
सतेन तु रहितापि स्यादिति चेदुच्यते कथमिति। सत्सविद्रूपमात्रस्याधिष्ठानस्यारजतस्याध्यस्यमानस्य रूप्यत्वान्वी
दात्म्यमस्त्येव। तत्र ह्यधिष्ठानसामान्यांशस्याध्यस्यमानविशेषांशस्य रूपित्वसामान्यविशेषभावेन वा गुण
गुणिभावेन वा समानाधिकृतस्यान्यत्राल्पतरांशवतः पदाधिष्ठानसामान्यांशस्याध्यस्यमानविशेषांशस्य
रूपित्वसामान्यविशेषभावेन वा गुणगुणिभावेन वा स्य र्थस्य दर्शनाद्न्यतरांशाध्यासो विभ्रमो दृष्टः तेन तु दिहा
धिष्ठानस्य चितो ध्यस्यमानस्य चानात्मनो नास्ति सादात्म्यं तत्तत्ताव ह्रिषयिणोश्चिदेकरसत्वान्नयुष्मदंशसंभव
इत्यादिना। अयमाशयः दुष्टं चिद्देशः स्वाभाविको वास्यादागंतुको वेति न स्वाभाविक इत्याह। स्वतन्त्रं इति॥
चैमंहि जडश्चैतन्यस्य कर्मकारकतयावभासते तत्कथमेकस्यां क्रियायां कर्तुर्विपरीतस्थानगतकर्मकारक
मात्मा स्यादित्यभिप्रायः आगंतु [illegible] कश्चेत्स हेतुरहेतुर्वा निर्हेतुश्चेत्तत्राह। परिणामि वा दिति। न हि

निरवयवं वस्तु स्वतस्सावयवाकारेण परिणममानं दृष्टमित्यभिप्रायः। ममेदं तु रिमाद्धा। येयं मन्वानादिति॥
नहि निरवयवमाकाशं द्वैतरूपरागेण परिणममानं दृष्टमित्यर्थः। नहीनात्मैवाधिष्ठानमात्मांशत्वात् कर्क
विदृष्टमितिनेत्याह। विषयस्यापीति। समवादित्ययमर्थः। यथा दृष्टं दुःखं तत्रं नप्रत्यक्षगोचरानुमेयमेव
तत्। एवं विषयस्यापि स्यादिति पद्गते पिनानानान्यच्छिदाकारपरिणामो जडोपादानस्यापि कार्यस्य जडत्
त्वात्। तच्चात्ताचैतन्यमेवान्तात्मावांशत्वेन स्वीकरोतीति विवेकं त्राह विततेरप्रतिवैमत्कमत्वादिति। तस्मात्कवि
दपितात्मादर्शनादस्मतरांशदर्शनेनान्यतरांशस्यासोधोयपद्यत इति। तद्धर्माणाममपि सुतरामित्यास्य
भाव एवाध्यासस्य युक्त इत्यतः प्राक्तनो ग्रंथः स्पष्टार्थः। नस्वहंकारादिषु शरीरान्तेष्वहमित्येव प्रत्ययोगैन वि
दमिति कथमयुष्मादस्यगोचरत्वमिति तत्राह। नद्धलनिर्भासि यदिति। तस्यास्मत्प्रत्ययगोचरस्य चैतन्य
स्य बलेन निर्भासत्वाद् देहंकारादेः प्रतिभासते युष्मदर्थत्वाभावेप्यपरोक्षत्वं तथावभासत्वेन लक्ष्यते न युष्म दमे
दर्शाभावोऽपुस्यत इत्यर्थः। चैतन्यात्मपृथक्तेनावभासं तत इत्यतः करणकल्पाधीनानेवावभासंतर इत्यर्थः। न न

योवयवसामान्यस्याहंरूपाभावादात्मनि कर्तृत्वादेरहंकाराद्युपाधिनिमित्तभ्रमत्वापि शरीराद्यध्यासस्य सोपाधि
कत्वमत्वाभावादहंरूपेहंकारादिशरीरांतपदार्थाध्यासस्यासंतत्वंज्ञा प्रसंगी करोति। यद्यप्येवमिति निरुपाधिक
भ्रमकार्यदर्शनमेव गुणावयवसामान्याभावेपि केतकीगंधसदृशः सर्पगंध इति वत्सादृश्यपतरं वाशंखपीति
मादाविव कारणांतरवाकल्प्यत इत्याह तथापीत्यादिना एवमध्यासस्यापीत्यतिप्रायः अहंइदंने ना। नैसर्गिकशब्दा
र्थमाह। अस्मत्प्रत्ययसत्त्वाभावात्रानुबंधीति कथमात्मनि कर्तृत्वभोक्तृत्वद्वेषसंयोगरूपाध्यासः। तत्र भोक्तृत्वाध्यासः
कर्तृत्वाध्यासमपेक्षते। अकर्तुर्भोगाभावात् कर्तृत्वं च रागद्वेषसंयोगाध्यासमपेक्षते तद्रहितस्य कर्तृत्वाभावा
त् रागद्वेषसंयोगश्च भोक्तृत्वमपेक्षते। अनुपभुक्ते तज्जातीये वा रागाद्यनुपपत्तेरेवं बीजांकुरवद्धेतुपरंपरायाअना
दित्वादध्यासस्य नैसर्गिकत्वमिति। लोकव्यवहारशब्दोऽध्यासाभिधायीति दर्शयति लोक इति मनुष्योहमित्यादिना
व्यवहारोभिज्ञाभिवदनमुपादानमर्थक्रियेति चतुर्विधः। तत्र मनुष्योहमिति ज्ञानाभिधाने व्यवहारशब्दमर्हत इति
भावः। अन्यस्यान्यात्मतावभासोऽविद्येत्युक्ते शुक्तौ रजतादिभ्रमस्यानविद्यात्वप्रसंगो माभूदिति सत्यस्य वस्तु

नो। मिथ्यावस्तुत्वमभेदावभासो विवर्त इति स्वसिद्धांतमंगीकृत्य सत्यान्ते मिथुनीकृत्येत्युक्तं तद्व्याचष्टे। सत्यमनिदं चेत
न्यमित्यादिना। ननु क्त्वाप्रत्ययोपादानादर्थतः क्रियाभेदः पूर्वापरीभावश्चांगीकर्तव्यः तत्कथमध्यासमिथुनीक
रणलोकव्यवहाराणामेककार्यत्वमिति नेत्याह। अध्यस्य मिथुनीकृत्येत्यादिना। ननु किमिति स्वरूपमात्रपर्यवसानं।
क्रियाभेद एव क्त्वाप्रत्ययस्य सामर्थ्यादुपादीयतामिति नेत्याह। उपसंहारे चेति। नहि पदमात्रवैयर्थ्यभयाद्वाक्यार्थो ने
सक्ति कगुणविशिष्टो विशेष्यपदार्थोऽध्यास उपक्रमोपसंहाररूपो भवतु मुख्य इत्यभिप्रायः। किं तर्हि क्त्वाप्रत्ययमवलंब
नमिति। प्रतिपत्तितः क्रियाभेदः पूर्वापरीभावाविवित्याह। ततः चैतन्यं पुरुषस्य स्वरूपमिति वद्व्यपदेशमात्रमुपचारमा
त्रमित्यर्थः। कथमेकोपाध्यासोऽन्योन्यात्मकता। सत्यान्ते हमिदं ममेदमिति च विशेषणभेदाद्विशिष्टोऽध्या
सः परोपाध्योऽभिधीयते। विशिष्टार्थप्रत्ययाश्चव्यवहर्तुं क्रमेण भवन्तीति प्रतिपत्तितः पूर्वापरीभावविशेषणभेदात्तु वि
विशिष्टक्रियाभेदं वांगीकृत्य क्त्वाप्रत्यय इति। तत्राज्ञानमित्युक्तेर्ज्ञानाभावमात्रमुक्तं स्यात्कथ्यमुक्तेर्भ्रांतिज्ञा
नमिति स्यात्तदुभयव्यावृत्त्यर्थं निरूप्यपदार्थं दर्शयति। मिथ्याचतद्ज्ञानं चेत्यादिना। ननु कथं मिथ्याज्ञानमध्या ९

मस्योपादानंतस्मिन्नसमध्यासोदयादसतिचानुदयादितिक्रमः।ननुअध्यासस्यप्रतिबंधकंतत्त्वज्ञानंतदभाववत्त्वाज्ञा
नमितिप्रतिबंधकाभावविषयतयाज्ञानस्याध्यासेनान्वयव्यतिरेकावन्यथासिद्धौनैतत्सारं।पुष्कलकारणेहिस
तिकार्योत्पादविरोधिप्रतिबंधकं।नवाध्यासपुष्कलकारणेसतितत्त्वज्ञानंकार्यप्रतिबंधकतयाज्ञायते।किंत्वध्यासेवा
ध्यासकारणेतत्त्वज्ञानोदयः।तस्माज्ज्ञानाज्ञानान्वयव्यतिरेकौप्रतिबंधकाभावविषयौ।तथापिविरोधिसंसर्गाभा
वविषयावितिचेन्न।कार्यस्यकारणापेक्षाहिप्रथममुपपद्यते।नविरोधिसंसर्गाभावापेक्षा।तस्मात्प्रथमापेक्षि
तकारणत्वंनिमित्तान्वयव्यतिरेकौमायासहितौकुर्वंति।नतुलब्धसत्ताविषयेंद्रियादिदोषः।कारणमितिसमंनि
मित्तंतुतदुपादानापेक्षायामज्ञानमनुप्रविशतिसर्वंचकार्यंसोपादानंघटादिवदित्यनुमानात्क्रियागुणादेरपि
साश्रयस्यैवोत्पत्तेरुत्पद्यमानाश्रयस्यैवोपादानत्वात्।नचात्मांतःकरणंवाभ्रांतिज्ञानोपादानंभविष्यति॥ना
त्मनोऽपरिणामित्वादंतःकरणस्यचेंद्रियसंयोगादिसापेक्षत्वान्निर्व्यापारेचप्रसुप्तप्रमातृविपरिवर्तिनितदपा
यादधिष्ठानज्ञानेनाध्यासासिद्धेश्चात्रतदन्वयव्यतिरेकयोरंतःकरणस्यचजडत्वादज्ञातृत्वादात्मनोज्ञातत्वप्रसं

णात्वात्। तस्मान्मिथ्यार्थतज्ज्ञानात्मकं मिथ्याभूतस्याध्यासस्योपादानकारणं सापेक्षं भवताभ्युपस्थानतया कार्यादि
निमित्तकारणेषु विद्यमानेषु मिथ्याभूतस्यैव सर्वकार्यस्य भावानुकूलस्य सर्वज्ञानुगमात् ज्ञानस्यात्माश्रयतया
ध्यासि ज्ञानाश्रयकोटिनिक्षिप्तत्वान्मिथ्याज्ञानमेवाऽध्यासोपादानं। नात्मान्तःकरणकाचादिदोषा इति सूक्तं॥
आत्माश्रयाध्यासस्य शुक्तिकासंसर्गो विभ्रम इति वक्तव्ये एकस्यैवाध्यासस्य नैसर्गिकत्वं नैमित्तिकत्वं चविरुद्ध
मिति चोद्यपति। कथं पुनरिति तत्र प्रथमं तावदध्यासप्रवाहजन्मनोपादानकारणरूपेण नैसर्गिकत्वं कार्यव्य
क्तिरूपेण नैमित्तिकत्वमित्यविरोधं दर्शयितुमात्मनि भावरूपमज्ञानं साधयति। अवश्यमेषा विद्याशक्तिरिति॥
अवश्यमेषेति प्रमाणद्वयवक्तामाह॥ प्रत्यक्षं तावदहमज्ञो मामन्यं च न जानामीत्यपरोक्षावभासदर्शना। ननु
ज्ञानाभावविषयोयमवभासः नापरोक्षावभासत्वादहं सुखीतिवदभावस्य च षष्ठप्रमाणगोचरत्वात्स्वप्रज्ञा
भावावादिनोपि नात्मनि ज्ञानाभावावगमः संभवति। मयि ज्ञानं नास्तीति प्रतिपन्नावात्मनि धर्मिणि प्रतियो एम १०
गिनि चार्थे वगते तत्र ज्ञानसद्भावात् ज्ञानाभावप्रतिपत्त्ययोगात् अनवगते पि धर्म्यादौ सुतरामभावानवगमात् षष्ठ

प्रमाणगोचरे फललिंगभावानुमेयेपि ज्ञानाभावे आत्माद्यवगतेनवगतेप्यात्मनि ज्ञानाभावप्रतिपत्त्ययोगादि
हचत्वदुक्तमर्थसंख्यांवाशास्त्रार्थकामज्ञानामीतिविषयव्यावृत्तमज्ञानमनुभयतस्तद्बलाद्देशवर्त्तनेभावरूपाज्ञा
नप्रत्यक्षवादेतुसत्यपाश्रयप्रतियोगिज्ञानेज्ञानाभावस्येवभावांतरस्यापिनानुपपत्तिर्निर्णयंतुंशक्यते। नन्वाश्रय
प्रतियोगिज्ञानमन्तमपिसाक्षिचैतन्यंभावांतरस्याज्ञानस्यनिवर्त्तकंतस्याज्ञानविषयप्रतिभासत्वात्। नहि स्वज्ञाने
नैवस्वयंनिवर्त्तते। नन्वज्ञानस्यआवर्त्तकोविषयःकथंसाक्षिचैतन्येनावभास्यते। प्रमाणायत्तत्वाद्विषयसिद्धेरिति।
उच्यते। सर्ववस्तुज्ञाततयाज्ञाततयावासाक्षिचैतन्यस्यविषयएव। तत्रज्ञाततयाविषयःप्रमाणव्यवधानमपेक्ष्य
ते। अज्ञातत्वसामान्याकारेणविशेषाकारेणवाज्ञानव्यावर्त्तकतयासदावभास्यतेइत्युपपत्तिसहितमज्ञानेप्रत्य
क्षेभावरूपेतात्मन्यज्ञानेगमयतीतिसिद्धं। अनुमानमपिविवादगोचरापन्नप्रमाणज्ञानं। स्वप्रागभावव्यतिरिक्त
स्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वंतरपूर्वकंभवितुमर्हत्यप्रकाशितार्थप्रकाशकत्वादंधकारेप्रथमोत्प
न्नप्रदीपप्रभावदिति। ततश्चज्ञानेनसमानाश्रयविषयंभावरूपमज्ञानंसिद्धं। प्राक्क्रिरिस्यात्मपरंतंत्रतयात्मनःसर्व

कार्योपादानत्वस्य निर्वोढत्वमाह। न तत्त्वरूपमात्मतत्त्वं तत्सत्तामात्रानुबंधिनी सर्वथः किंवार्थापत्तिरपि भावरूपाज्ञानस
द्भावे प्रमाणमित्याह। अन्यथा मिथ्यार्थावभासानुपपत्तेरिति। विशुद्धब्रह्मात्मनि शुक्तिकायां वाहंकाररजताद्यध्या
सस्यार्थज्ञानात्मकस्य मिथ्याभूतस्य मिथ्याभूतमेव किंचिदुपादानसत्वेषणीयं। सत्योपादानत्वे कार्यस्य कारणस्व
भाववत्तयाध्यासस्यापि सत्यत्वप्रसंगात। न स्यापि मिथ्योपादानस्य सादित्वे तथाविधोपादानान्तरकल्पनाप्रसंगाद
नादेव तन्मिथ्योपादानमिति कल्पनीयं। यच्चानादित्वे मिथ्या मिथ्योपादानमात्मसंबंधि च तदज्ञानमिति। मिथ्या
ध्यास एव न तथाविधाज्ञानोपादानकारणमंतरेणानुपपद्यमानस्तत्कल्पयतास्यकं। ननु येन यस्यातिशय उत्प
द्यते स तस्य विषयः। न चाज्ञानेनानात्मनीश्चावरणातिशयजन्मप्रमाणमावात्। अर्थानुपपत्तेश्च। न तावदवग
तेनीलार्थे तत्रावरणकृतमवगंतुं शक्यते। अनवगते तु नतरां। नन्वपगते स्फुरणं माहुः नमित्यवगतैस्मतां नाधारा
वाहिकविज्ञानमध्ये प्रथैर्वमवागतस्यापि पश्चाद्वगमदर्शनात। ननु चिदानीमेवावगतं च हर्षमनवगतीत्यधय एम
ति। न। पूर्वानवगतिम विज्ञानीमेवावगतमित्यवधारणायोगात्। ननु पूर्वापरप्रसमितायां मध्ये न वगतिरवगम्य ११

तइतिचेन्न।अनवभासमिज्ञानुपपत्तिर्मध्येनवगतिंसाधयतिधारावाहिकेष्वात्मनिसदावगतेस्तद्दर्शनान्मध्येज्ञानस्य
सभावादनवगतिरनुगम्यतइतिचेन्न।नावगतेर्विस्मृतिनियमाभावात्।तथापिविषयानवगतिःप्रतीयतइतिचेत्स
त्वंविषयैःसहस्वज्ञानस्यसाक्षिचैतन्येऽध्यासात्प्रतिभासः।नबाधस्तस्यावरणमस्तिहिचेंडादिवदध्यस्तस्यप्रमाण
गम्यत्वाभावात्तस्मादज्ञानस्यनात्मन्यावरणेप्रमाणं।नचस्वरूपमेवप्रकाशाद्धीनस्यजडस्यावरणव्यौविसंभवतितस्मा
दतिशयाभावान्नज्ञानविषयोनात्मेतितत्राहसावनद्धेषुवस्तुषुनत्वन्यथानासंप्रतिवघ्नातीतिकिंत्वन्यदेवाना
त्मन्यतिशयकार्यंकृत्वात्तद्विषयमज्ञानमितिवस्मनइत्यभिप्रायः।तत्रहेतुःप्रमाणतैकल्यादेवेति।उभयवाचैतन्यप्र
काशेनजडानांनित्यवदत्वयान्नित्यवत्प्रकाशेप्राप्तेसंभवत्येवानात्मन्यावरणकृत्स्नमित्याशंक्याह।प्रमाणवैकल्या
देवेति।अनात्मप्रमाणस्यैचैतन्यस्यवैकल्यादावरणादेवविषयानवगतिसिद्धेर्नविषयेपृथगावरणंकल्पनाप
मित्यर्थः।इतश्चानात्मावरणमित्याहरजतप्रतिभासादिति।यद्यात्माश्रयमज्ञानमनात्मावरणंस्यात्तदाव
रणविनाशमन्तरेणविषयावभासायोगाद्विषयज्ञानेनात्मन्यज्ञाननिवर्त्तेतोऽतःसत्यामेवात्माविद्यायांविषय

त्रिकालेषु विषयस्वरूपप्रतिभासदर्शनान्नानात्मावरणमज्ञानमिति भावः। ननु शुक्तिकाविषयमज्ञानमन्यदेव नत
ज्ञानमितिभावः। ननु शुक्तिकाविषयं निवर्त्तते न त्वात्मविषयमज्ञानमात्मनि दृश्यमानमिति। नैवाऽऽत्माश्रयमा
त्मविषयं वाज्ञानमंतरेणानात्मसु प्रतिविषयं भावरूपाज्ञानसद्भावे प्रमाणाभावाद्विषयाच्छादकस्य प्रमाणावैक
ल्यादप्युपपत्तेः। किंच तद्धि निशायामज्ञानजन्यमात्मविषयवाह्याध्यात्मिकेषु वस्तुषु। विस्मृतात्मविषयमज्ञानं दर्शितमि
तितदाह। नस्तरेण रूपांतरावभासहेतुरेवेति नन्वत्राप्यनुपपत्तिः समाना कथं शुक्तिकाज्ञाने हि रूपांतरावभासं नि
वर्त्तयत्तदुपादानमज्ञानमपि निवर्त्तयतीति चेन्मैवं। तत्र कथं शुक्तिकाज्ञानात् सहाज्ञानेनाध्यासे निवर्त्त्यमाने पुन
रात्मन्यज्ञाने दृश्येत। अतः प्रतिविषयमज्ञानभेदः। अध्यासस्याज्ञानानुपादानत्वे चोपादाननिवृत्तिमंतरेणाध्यास
निवृत्तिर्वा सम्भाव्यते। अप्येतस्मिन्मते शुक्तिकादिज्ञानेऽज्ञानाद्यध्यासानां स्वकारणे प्रविलयमात्रं कि
यते। मुसलप्रहारेणेव घटस्याऽथवा मूलाज्ञानस्यैवावस्थाभेदास्तान्युपादानानि शुक्तिकादिज्ञानैः सहाध्या एम
सेन निवर्त्तंत इति कल्प्यतां। कथं तु मैनं लौकिके सहाज्ञानेनाध्यासस्य तज्ज्ञानान्निवृत्तेरप्रतिपत्तेर्ब्रह्मज्ञानात्सहाज्ञा १२

नेनाध्यासस्य निवृत्तिर्दृष्टद्वारेण कल्प्यत इति। नैष दोषः। तच्चावभासाविरोधिनो ग्रहणमिथ्याज्ञानादेस्तत्त्वज्ञानेन
निवृत्तिदृष्टा दर्शनादिहापि तत्त्वावभासविरोधितयैव भावरूपाज्ञानादेः कल्प्यमानत्वात्। तस्य ब्रह्मज्ञानाद्व्यवधा
न्निवृत्तेरुपपत्तेः। न चावरणपक्षोक्तदोषप्रसंगः विषयव्यावृत्तेन रूपान्तरस्य भ्रान्तिज्ञानेनावगमात्। नन्वेवमात्मस्य
प्यज्ञाननिमित्तमावरणकृतं नास्ति॥ कथं न तावदावरणं प्रकाशविलोपः। स्वरूपस्यानपायात्। नापि सत एव
प्रकाशस्य कार्यप्रतिबंधस्तानस्य विषयावभासात्मनो दितस्य स्वकार्यप्रतिबंधप्रतीत्ययोरभावात्। तस्मान्नैवात्म
न्यपि भावरूपमज्ञानमनुपयोगात्। दीप्तिरत्राहमस्यगात्मनि तु चितिस्वभावत्वात् स्वयंप्रकाशमान इत्यादिनात
स्यानवभासरूपं तेन ग्रंथेन। अयमर्थः। अस्ति प्रकाशत इत्याद्यभिज्ञादिव्यवहारपुष्कलकारणे सत्यपि नास्ति न प्र
काशत इति यो यमात्मनि तच्चालंबनो व्यवहारः स भावरूपेण केनचिदात्मन्यावरणमंतरेण नोपपद्यते। सत्यपि पुष्क
लकारणेऽप्रसक्तिचान्तरणे सन्निहिते हि दृष्टे प्रकाशत इत्यादिव्यवहारदर्शनात्। ततो नास्तिव्यवहारो न प्रकाशत इति व्य
वहारोऽन्यथानुपपत्त्या भावरूपमज्ञानं गमयतीत्यर्थापत्तिरनुमानं वा समुदायार्थः। तत्सिद्ध्यर्थमात्मनि प्रकाशत

इत्यादिव्यवहारं प्रतिपुष्कलकारणे ऽन्तःकरणे नां दर्शयति। विविक्तस्वभावत्वादिति। किमर्थी ह्यावरणमिति तन्ना
ह। ब्रह्मस्वरूपानवभासस्येति। नास्ति न प्रकाशत इति व्यवहारो ह्येव न योग्यत्वव्यवहारकार्यदर्शनादेव
कल्प्यमानस्येत्यर्थः। भ्रमाधिष्ठानप्रतिबंधमंतरेण तत्र विपर्ययकार्यमुपपद्यते ऽविद्यासंबंधवादिवारण
स्यानिरूपिताकारतावधुक्तेति भावः। ननु प्रमाणवैकल्यादेवाज्ञाप्यग्रहणमिति तन्नेत्याह। नस्यनिमित्तत्वा
दिति। अतोनवभासान्पुष्कलकारणे सति परिशेषादिदमायातमित्याह तदुक्तं निसर्गसिद्धाविद्याशक्तिप्र
तिबंधादेव तस्यानवभासमिति पूर्वग्रंथांतरस्यासंभवादिति भावः। अतः कार्यदर्शनोन्नेयमावरणकृत्स्न
विपर्ययं चात्मनि कुर्वाणमज्ञानं भावरूपमेवोभयकारणत्वान्यथानुपपत्त्या कल्प्यत इत्याह। ततः सा प्रसक्ति
रीति। न च ग्रहणमिथ्याज्ञानतत्संस्कारेभ्यो ऽन्यदृशं नात्मैकत्वनपश्यामः। तदेवतीतस्य सर्वस्य प्रकाशमपित्र
ह्मस्वरूपावभासं प्रतिबध्नातीति तन्नेत्याह। सुषुप्ताहेयेति। तत्राप्यविद्याशक्तिः संस्कारशेषतिष्ठति न संस्का १३

रादय एवाज्ञानमित्यर्थः। कथं नतावत्सुषुप्तादौ स्वयंप्रकाशब्रह्मस्वरूपानवभासः पुरुषांतरसंवेदनवद्दृष्टमि
न्नवादिनिशकं वक्रुमेकवभ्रकेतेः। नापि मिथ्याज्ञानप्रतिबंधात् तत्र तस्याभावात् नापि तत्संस्कारप्रतिबंधाद्भ्रां
तिसंस्काराणां तत्रावभासस्य प्रतिबंधकत्वाभावात् तस्य तत्त्वपरिज्ञाने भ्रमसंस्कारे शुक्तिकावबोधदर्शनात्। नाप्यग्र
हणप्रतिबंधात् स्वरूपग्रहणस्य नित्यत्वात् स्वयंप्रकाशमाने संवेदने तद्विषयकादाविद्याग्रहणस्याप्रतिबंधक
त्वात्। नापि कर्मणा स्वरूपावभासविरोधिता। सर्वदाणुमात्रस्यापि चैतन्यस्यानवभासप्रसंगात्। अज्ञानेपि तुल्य
मिति चेत्। न तस्य स्वविषयचैतन्यावभासं प्रत्यप्रतिबंधकत्वात्। न चाज्ञानस्यैव कर्मणां नित्यवत्त्वाद्धि चैतन्यस्याना
वभासकता। येन तदभासकतया मा भूद्धि चैतन्यमप्रतिबद्धं स्वयंप्रकाशेत न च कर्मणामप्यस्वाश्रयावभासविरोधीनी
ति प्रमाणमस्ति। संस्कारद्वारा च कर्मणां भ्रांतिसंस्कारवत् प्रतिबंधकता। तस्मात्सुषुप्तादौ स्वरूपानवभासमव
हारोग्रहणमिथ्याज्ञानतत्संस्कारकर्मभ्योऽन्यदेव किंचित्प्रतिबंधकमज्ञानं कल्प्यतीत्यर्थः। ननु दृष्टांतरमेव
प्रतिबंधकं कल्प्यतां किमज्ञानकल्पनयेति चेन्न। ब्रह्मज्ञानात् प्रतिबंधनिवृत्तिमंतरेण स्वविषयावभासायोग

तस्मान्न निवर्त्यस्य चाज्ञानत्वात्। ननु कश्चिद्भेदाभेदाभ्यां सर्वसंकरवादी वेदान्तार्थग्रहणं संप्रदायहीनो दुर्जनरमणीयं वा
चकल्पितानि। न किलाग्रहणमिथ्याज्ञानतत्संस्कारादिभ्योऽन्यत्सकलसंसारबीजभूतमवस्थात्रयेप्यनपायि संसारवि
मोक्षादरूपमानमज्ञानं नामास्ति। किंतु भ्रान्तिज्ञानमग्रहणं वाऽज्ञानमिति। तत्रायं प्रष्टव्यः। केयं भ्रान्तिरित्यहंकारा
दिष्वात्मप्रत्ययेनानात्मन्यात्मबुद्धिरिति चेद्देहादिस्मरसाक्षिणस्तावत्सर्वत्र संकीर्णचेतसः। खंडो गौरित्यादिभेदाभेदप्रत्ययं
प्रमाणमुपपादयन्नहं मनुष्य इति प्रत्ययं तेन दाभेदविषयं किमिति प्रत्येष्यसे। नाहं मनुष्यो ब्रह्मास्मीति प्रत्ययप्रामाण्यादिति
चेत्। तन्न नायं खंडो गौः किंतु मुंडो गौरिति प्रत्ययेपि खंडमुंडाभ्यां गोत्वस्याभेदवत् शरीरब्रह्मभ्यां जीवस्याभेदप्रत्ययप्रा
प्रामाण्योपपत्तेः। इदं रजतं न वङ्गमिति रिति चेन्न खंडो गौरित्यत्रापि तथात्वप्रसंगात्। नायं खंडो गौः किंतु मुंड इति प्रत्ययं
न्तरे खंडमुंडगोभ्योपाधौ निषेधप्रत्ययप्रामाण्यान्नत्वव्यवहारानुच्छेदाद्भ्रामाण्यमिति चेन्नाहं मनुष्य इत्यत्रापि तुल्यमोहा
वस्थायामपि सर्वात्मतानवसर्वशरीरेन्द्रियाद्यभिमानव्यवहारानुच्छेदात्। जातिव्यक्तिगुणगुणिकार्यकारणादिविशि
ष्टस्वरूपांशांशिसंबंधा यत्र विद्यंते। तत्र भेदाभेदौ न शरीरात्मनोस्तेषामभावादिति चेत्तर्हि शरीरशरीरिसंबंधोपि तु ल्म २४

णगुणपारिवर्तभेदाभेदनिमित्तस्याज्ञस्य यात्सर्वसंकरवादितदाञ्चयण कृशिष्यतात्विरकालेसमुपार्जितावाध्येन।
श्रुक्तिविवेचेतनस्वरूपशरीरयोः कार्यकारणभावः चेतनस्वरूपाशस्यब्रह्मत्वादितोनेनैवध्वांतिरस्ति॥ किंचध्वांतिरा
न्तःकरणपरिणामस्यैवत्वदात्माश्रयाविद्यानस्यात। अंतःकरणपरिणामएवात्मन्यध्यस्तइतिचेन्नथाप्यन्यथाख्या
तिवादिभिः संसर्गस्यान्यत्वादात्मन्यविद्यासंबंधोनस्यात। नचात्मपरिणामोध्वांतिःपरिणामित्वान्नस्वत्वानगुणस्य
द्रव्यस्यपुनर्ज्ञानगुणांतराकारेणपरिणामः संभवत्यवांतरज्ञातीयस्यैकस्मिन्द्रव्येगुणद्वयस्ययुगपत्समवायायो
१८ गात। नहिपटेशौक्ल्यद्वयंयुगपत्समवैतितस्मादनादिमिथ्याज्ञानानभ्युपगमेनकापिलस्यसंकरवादितोऽविद्यासं
भवस्यनादिमिथ्याज्ञानसंबंधोप्यात्मन्यज्ञानवकाल्पनिकत्वादाकाशकार्ल्यवदात्मनःस्फटस्फटिकानिविहंतासलम
तिविस्तरेण॥ अत्रेदं। प्रत्यक्षानुमानार्थापत्त्युपोनादिभावरूपाज्ञानेप्रमाणत्वेनोपन्यस्ताः। तेचैवं। तेनकारण
रूपेणकार्यरूपेणचैनैमित्तिकत्वेनैसर्गिकेत्वेनविरुद्धेद्वस्यउपसंहरति। अतोनैसर्गिकोप्यहंकारेति। अन्योन्यधर्मा
ध्यासादित्यध्यासस्वरूपंदर्शयतीत्यनेनोग्रंथःस्पष्टार्थः। निःकलंकचैतन्यैकतानेनिरंशानंदैकरसेऽज्ञानादिसाक्षिण्य

नादिसिद्धेष्वज्ञानाध्यासेकादाचित्कस्याध्यासस्याश्रित्याहाहममिति तावत्प्रथमोध्यास इति। नन्विदं रजतमितिवद
ध्यासेदंरूप्यमहमित्यत्रापिचिक्त्यमहमिति चैकरूपेणावभासते तेनाध्यास इति चोदयति। नन्वहमिति निरं
शैत्येनस्यमात्रमिति। यथा हि रूप्येण ध्यासे भवत्तथात्वस्मत इत्याह। यथाऽध्यस्तांशांतर्भाव इति। नन्वंतःक
रणेंद्रियाणामात्मनः पृथक् मन्त्वोपलब्धेमावाद्ध्यस्ततयैवासिद्धेरात्मतत्त्वावबोधेन च स्वरूपतो विलयप्र
वणान्स्वरूपेण संसृष्टतयावात्मस्यस्तमया सिद्धेरन्तःशरीरं पुनरिंद्रियेरिदंवुद्धितीग्रहीतत्वात्केवलसाक्षि
वेद्यत्वाभावादुत्क्रांतेष्वात्मनिदृश्यमुपलब्धेर्नतेषु लयप्रवणांदेनाध्यस्ततयासिद्धमिति चोदयति नन्विदमि
त्यहंकर्तुरिति। शरीरायतिरिक्तं ममवुद्धिग्रहीतं सुतरामनध्यस्तमित्याह। ममेदमितिचेतिशरीरादिपदार्थस्वरू
पस्यमिथ्याकल्पितकर्तृभोक्तृत्वमात्रदोषसंयुक्तात्मार्थतयैवकार्यतया भोग्यतया प्रतिपन्नया हृष्वतयाचना
दर्थेनैवसंसृष्टत्वात्स्वरूपेणापिमिथ्यात्वेस्वप्रदृष्टांतेनानुमातुंशक्यत इत्याह। उच्यते यदेवाहंकर्तैसारि
ना। साक्षीतिकेंदर्शयति। एवमहंकर्तृत्वप्रमुखेइति। इष्टेरिंद्रियादावभासस्याविद्याध्यासत्वेशास्त्रीयविषयप्रयो एम २५

जनसिद्धिःफलिष्यतीत्याह।अनन्ताद्वयब्रह्मात्मानुभवपर्यन्तादिति।तादृग्ब्रह्मात्मानुभवोबंधनिवृत्तिश्चोपपद्यतइत्य
र्थः।विषयप्रयोजनसिद्धौकिमायातमितिशास्त्रारंभकार्त्तव्यतासिद्धेरित्याह।तदर्थंविषयवेदांतमीमांसारंभइति।तेष
वब्रह्मात्मानुभवबंधनिवृत्तीअर्थप्रयोजनेविषयश्चयस्यवेदांतमीमांसारंभस्येतिविग्रहः।सर्वलोकप्रसिद्धइत्यनेन
स्योत्तरभाष्यस्यतात्पर्यमाह॥आहकोयमितिइदानींविभज्यावांतरतात्पर्यंकथयति।तत्रापीति।लक्षणसंभावना
परंभाष्यमाक्षिपति।यद्येवमिति।किमितिलक्षणसंभावनेनापेक्ष्येतेइतितत्राह।नह्यनिश्चितात्स्वरूपमिति।प्रमाणमे
वहिप्रमेयमन्यस्यान्यात्मभावज्ञासमर्थासंव्यवस्थापयतस्यदेशकालोपाधौसंभावितरूपंसर्वतोव्यावृत्तासाधा
रणरूपंचव्यवस्थापयति।किंपुनर्लक्षणसंभावनोपन्यासेनेत्यर्थः।नन्वनुमानादिप्रमाणनिर्णीतेषुवल्कमा
तेषुविशेषेणलक्षणसंभावनेपृथगपेक्ष्येतेइत्यतआह।दुःसंपादमितिविशेषतइत्यसाधारणाकारेणाकारव्या
वृत्त्यपेक्षयार्थः।तत्रदुष्टुरन्यस्यान्यत्वेनान्यात्मनावभासोविद्यतइत्येतावतिप्रमाणंव्यपते।नतस्याविद्याक्षंत्यध्यास
मिथ्यात्वेगमकत्वप्रमाणेननसिध्यतीतिपरिहरति।उच्यते॥तदेहेंद्रियादिष्वित्यादिना।नन्वन्यस्यान्यात्मनावभास

प्रमाणेनैव तन्मिथ्यात्वमपि सिद्ध्यतीत्यसमेयेक्यादिति चोदयति। तत्कस्य हेतोरिति। नानुभवाभावादेवेति परिहरति
लोके इति। ननु प्रमाणेषु सत्सु किमिति अनुभवाभावः प्रमाणाभेदादित्याह। बाधे हि सतीति। बाधानुपपत्तेर्मिथ्यात्वे प्रमा
णं प्रत्यक्षानुमानव्यवहारानुपपत्त्यागमाश्चात्मन्यनात्मतावभासे प्रमाणमिति भावः। नन्विहापि बाधनिमित्त
मितरेतरविवेकमन्तरेणान्यस्यान्यात्मनावभासोऽयमित्युपगंतुं न शक्यतेऽन्यथा स्वस्यैव स्वेनात्मनावभासः किं
न स्यादिति तत्राह। नेह सविद्यतइति यो लौकिकज्ञानादिनापरोक्षं विवेकमाश्रित्य परस्परात्मतावभासनिश्चयोप
रोक्षवाक्यस्य। निवृत्तिभासोच्छेदिनो भावात्तस्यैषो मिथ्यात्वाध्यवसायइति भावः। अतो विद्यात्वस्पष्टीकरणाय
लक्षणमेव वक्तव्यमित्याह तस्मादध्यासस्येति। नहि लक्षणप्रमाणाभ्यामेव वस्तुनिर्णयसिद्धिः प्रमाणेनैवासं
भावनानिराकरणात्तत्संभावनायाऽप्ययं कुतस्त्य वक्तव्येति चोदयति। नन्वेवमपीति। सत्यपि प्रमाणेतात्मव्यध्यस्तत्वाद्भाव
भासमप्यसंभाव्यमानतया निराकृतमनुभूयमानमित्यनुभवमेवावलंब्य परिहरति। सत्यमेवमिति। अध्यासातिक एम
ष्टइवातिरिक्तकारणमन्यदित्यर्थः। ननु प्रमाणेनैव क्वचिदसंभावनानिरस्यते। यथाकाशगमने पक्षिणां क १६

चिदसंभावनयाऽप्रतिभासो परोक्षोपि निरस्यते। यथाऽसन्निकृष्टपुष्पादौ तेनात्मन्यनात्मावभासः। कं पक्षमवलंब्य
ता। किमसंभावनापक्षमेवेति। विशेषं दर्शयन्ति। एवमपि विषयेऽसंग इति। अधिष्ठानस्याध्य स्यमानेन सहैक
ज्ञानविषयत्वं त्वंवक्तव्यं तदभावान्नाध्याससंभव इत्याह। विषय इति। दृष्टव्यतिरिक्तस्य कृत्स्नस्य कार्यकारण
सतत्स्याध्यासात्मवत्तेऽदृष्टेर्यविकाबादिवद्देशानुषंगो वक्तव्यः अतदभावात्त्वाध्याससंभव इत्याहासंग इति। अधि
ष्ठानस्याध्यस्यमानेन गुणावयवसादृश्यं वक्तव्यं तदभावान्नाध्याससंभव इत्याह। केनचिदपि गुणादिनेति। अ
धिष्ठानयाथात्म्यावभासोध्यासविरोधी तदभावान्नसंभव इत्याह निष्कलंकचैतन्यतयेति। नत्वात्मस्य विषया
स्वरूपेनवगतेनासंभावनाबुद्धिः अवगतेतुनाध्यास एव तिष्ठति। कुतोऽसंभावनाबुद्धिरिति। नैतत्सारमात्म
न्यविषयात्स्वरूपेपरोक्षावभासोऽसंभवात्मा बुद्धिहेतुरपरोक्षावभासोध्यासस्यानिवर्त्तक इत्यरुचेर्वा उपसंहरति।
तस्मादाशंकीति तदुक्तेन विततपंलेदृशं संभावनाप्रमाणं क्रमेणोस्यत इत्यर्थः। अनेन तद्भाष्यस्य तात्पर्यमाह॥

स्यात्कोपमिति। तत्रगौरितियुगपदर्थद्वयविवक्षायेत्यर्थः। उभयस्यचेहसंभवादिति। लक्षणप्रश्नसंभावनायैक्षेप
स्यचसंभवादित्यर्थः। उभयमत्रैवविवक्षितंचेत्तत्संभावनेनैवप्रथमंकिं—प्रदर्शयत्रदूष्यतेत्याह। तत्रापीति। स्वरू
पमाख्यायेतिप्राथम्येहेतुः। नत्वाहेतिपरोक्तिकथनंकिमर्थमित्यर्थनिर्णयप्रधानत्वाद्वादकथशास्त्रं। तत्रप्रमाण
तर्केसाधनोपालंभः सिद्धान्ताविरुद्धः पंचावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहोवाद इति। वादिप्रतिवादिभ्यां गुरुशि
ष्याभ्यांपक्षप्रतिपक्षपरिग्रहेणक्रियमाणार्थनिर्णयावसानावादकथाभवतीत्यर्थः। ननु परोक्तिकथनमि
त्याह। तत्रैवमुक्तेविषयइत्यादिना। तेनाक्षिप्तमाक्षेपरूपमप्यभिप्रायमनेनस्पष्टयतीतिमन्तव्यं। तस्य पुनरसावाक्षे
पस्वरूपेणविवृणोतीत्याक्षेपसंभावनायैतिव्याख्येयं। ननुशास्त्रेषुजल्पवितंडाभिप्रायेणापिपरोक्तिरस्तीतिनेत्या
ह। सर्वत्रैवंविधइति। ननुलक्षणवाक्येलक्ष्याभिधायिनः पदस्याभावात्साकांक्षत्वमनन्वयैकमित्याशंक्यावा
क्यंपूरयति। प्रश्नवाक्यस्थितमिति। ननुपरस्यपरात्मनावभासोऽध्यासइतिवक्ष्यति। तत्रकथमेकेनैवपरशब्देनल
क्षणद्वयंतदृत्याह। तत्रपरत्रेत्यत्रइति। अन्तरोग्रंथः स्पष्टार्थः। ननुघटादीनांभावेविधानात्कथंकर्मपरतयास्य १७

तिशब्दोकस्मात्स्यान्न इति तत्राह संज्ञायामपीति कर्तृव्यतिरिक्तकारकेषु संज्ञायामिवासंज्ञायामपि प्रयोगो भवत्येक
र्तरि वकारके संज्ञायामिति सूत्रादित्यर्थः ननु स्पर्धते चेदुपशब्दः किमर्थं इत्य स्पर्धमानेन तत्कथं न उपमासमासाय
इत्याह स्पर्धमानेन रूपमिवेति । ननु किमुपमासमासेन स्पर्धते एवेदं रजतमिति तिनेत्याह अन्येषु नः स्पर्धत एवेति । ननु च
स्तैरादिप्रमाणाभावान्न परिशेषात्तस्मात्तिरिति नेत्याह स्पष्टपुरोवस्थितत्वावभासनादिति । यथा स्वत्रवेदं रजतम
पं स्वट इत्यादावितरेतरसंसृष्टे सामान्यविशेषावरोह्यावभासेते तथेहापि पुरोवस्थितत्वावभासः नहि परमार्थे
दं रजतं संवेदनादाकारावभासस्य न्यूनतामंतरेण संसर्गसंविदंशाभावः शक्यते वक्तुमर्थाभावे कथमपरोक्षा संविदि
ति चेन्न यथा संविद्स्वभासाधीनत्वादर्थसत्तानिश्चयस्य । न ह्यर्थसत्तानिश्चयाधीनः संवित्सत्तानिश्चयोऽर्थसत्तानि
श्चयस्यापि निश्चयांतराधीनत्वप्रसंगात् । ननु नेदं रजतमिति स्फुरत्पूर्वसंवेदनादर्थाभावो निश्चितः । न तत्रापि पूर्वसंवे
दनेन सद्भावविषयेण विरोधादिदं रजताभावसंवेदनानामप्रतिविवेकज्ञानयोस्तत्र ज्ञानेपि संसर्गसंवेदनाभा
वः किं न स्यात् । अव्यवहार संवादज्ञानादिदं रजतं तत्र ज्ञाने संसर्गसंवित्सद्भावश्चेन्नार्थक्रियार्थसंवादज्ञानादर्थसंवि

त्स्तद्भावमिश्चयइतिवरतः संविसंवादज्ञानादर्थक्रियार्थं विशेषोपि संविदंतराधीनसंशयावनिश्चयप्रसंगात्।
नेनुसंप्रतिपन्नोर्थाभावः। तथाप्रतिभासमेवमिथ्यारजतस्योत्तरज्ञानेननिरस्तमयोग्यस्योपगमात्। लौकि
कपरमार्थदृष्ट्या रजतप्रतियोगिकाभावविषयत्वं द्रजतेत्रैकाल्याभावज्ञानस्येति संविद्द्वयानुरोधेनव्यवस्थासि
द्धेरथतत्रसंविद्द्वयोगात्तथात्वोभयमविद्विषयानुभवोनास्यवरजतंमिथ्यावरजततममादिति। नन्वपरोक्षमु
क्तिकाज्ञानाविवेकाद्रजतमपरोक्षंतथावभासतइतिनेयाहास्पष्टमिति। केयंस्पष्टतानाम। विवेकज्ञानसमर्थ
यतावंतंकालमिदंरजतमित्यनादितिसंसृष्टावगतस्वेनप्रत्यभिज्ञायोग्यतान्यथाप्रत्इजतमेवावंतंकालमिता
विविक्तमितिनिप्रतीयात्। इदंवातज्ज्ञानान्नयप्रवृत्तिरितिपदार्थेशज्ञानतत्त्वतःसोन्निर्यमादिहापिसंसर्गप्रवृत्ति
मित्रतासंसर्गज्ञानस्यस्पष्टतेतिपूर्वंदृष्टावभासत्वंतिस्पष्टार्थः। यदाज्ञानविशिष्टार्थएवाध्यास्तः। तदास्यर्थमा
णसदृशेत्यामनावलाप्समानोन्योर्थाभ्यासइत्येवंलक्षणपरतयावाक्यंयोजितं। यदातुनार्थविशिष्टज्ञान एम
मेवाध्यासस्तदास्मृतिसमानोन्यस्यान्यात्मनावभासोध्यासइत्येवलक्षणपरतयातदेववाक्यंयोजयितुंशक्यतइ १८

स्मार्तः यतोऽर्थान्तरे इत्यर्थाद्वाऽनुभूतसामर्थ्यादित्यर्थः कथमित्यादि स्पष्टार्थः। ननु सस्मृतिश्चेद्बुद्धिः प्रमत्वज्ञानवत्तद्य
त्रानुतवत्तज्जन्यत्वमित्याशंक्य संप्रयोगमात्रजन्यज्ञानादन्येषां सर्वेषामविशिष्टं सर्वप्रमाणजन्यत्वमन्वयव्यतिरेक
सामर्थ्यादित्याह न ह्यसंप्रयुक्तावभासिन इति। ननु संस्कारजन्यत्वमुपगतं वेदन्यसंप्रयुक्ते च चक्षुषि परतंत्रमन्य
विषयं ज्ञानमुत्पद्यते सा स्मृतिरेव तत्राह व्यवधानेन तु यज्ज्ञानमुत्पद्यते तदनुमानादिप्रमाणमिति प्रमाणस्मृति
रूपमेव विज्ञानस्य गृहीतार्थं मिथ्याज्ञानेनामाक्तीत्यख्यातिवादीयस्य निष्टते। अपर आहेत्यादिना। ननु स्मृ
तिश्चेद्रूपादि स्मृतिवत्तत्वार्थग्रहणप्रमाणाद्विविधस्मरामीति दर्शयेदित्यत आह प्रमोषश्चेति। ननु शुक्तिका
संप्रयोगे सा हृष्या इज्ञाने किमिति स्मर्यते तिमादृश्याच्छुक्तिकांतरमेव स्मर्यतामिति।। नेत्याह। इंद्रियादीनामिति।
ननु मा भूत्स्मृतेः प्रमोषात्स्वार्थविवेकिता ग्रहणं तु स्वार्थस्मर्यमाणाद्विवेचयेदिति नेत्याह सप्रयुक्तस्य चेति ननु
स्मृतिग्रहणयोर्योगपद्याभावात्क्रमवर्त्तिनो पूर्वज्ञानस्य व्यवधानात्प्रवृत्तिहेतुः। न च सामान्यमात्रज्ञानाद्विशेष
मात्रज्ञानाद्वा प्रवृत्तिरित्यत आह तेन दर्शनस्मरणयोर्निरंतरो सन्न्योरिति। निरंतरोत्पत्तेरेव प्रवृत्तिहेतुरित्यर्थः।

नचेदं रजतमिति सत्तादिसंसर्गप्रत्ययः प्रत्यभिज्ञावत्तुल्य इति। नेत्याह तु स्मृतैकत्वावभास इति। जन्मान्तरानुभूतं चन
स्मर्यत इति ताच्च वचनात् स्मर्यमाणत्वाच्च बालस्य तिक्तस्मृतिः कथमिति चोदयति। नन्वनाद्यादितितिक्तरसस्ये
ति। जन्मान्तरानुभूततिक्तस्मृतिः कल्प्यत इत्याह। उच्यत इति। जन्मान्तरानुभवस्योपकारितामाह स्मृत्यानुभूत
०वेति किमिति तर्हि जन्मान्तरानुभूतं किंचिदेव स्मर्यते न सर्वमिति दोषतुल्यतामाह। तस्मात्सिद्धमेवेति। किमिति
तर्हि ते एव जन्मान्तरानुभूतं सर्वं न स्मार्यत इत्यत आह। कार्यगम्यत्वादिति। न च तत्तत्वेन ज्ञानमिति दूषणप्रकारेणै
वदर्शिनः संसर्गभ्रम इति नेत्याह। एतेनाप्यसंप्रयोग इति वक्ष्यते च पूर्ववादिना प्रतिपादिते संसर्गज्ञानकल्पनागौर
वादख्यातिरेव युक्तेति भावः। अख्यातेकेयमख्यातिरिति।। न तावत्ख्यात्यभावमात्रं त्वनभ्युपगमात् किन्तु प्रतिपुंस
गात्। अन्यार्थिनो यत्र प्रवृत्तिहेतुज्ञानमिति चेद्व तर्हि न प्रवृत्तिकारितिवाच्य तत्र रूप्यं भ्रान्तिः। अथाविविक्ताने
कपदार्थज्ञानं तर्हि इदमिति रजतमिति वा पुरोवर्तिशब्दस्य स्मृतिहेतुतया विविक्तावभासनात् सामान्यवि ख्य
शेषयोरविवेकभ्रमः संभवति। न च भेदावमर्शेनैकत्वज्ञानमभ्युपगच्छतः सामान्यविशेषयोरविवेकः संभवतीति वि १९

त्काकारशून्यावभासनादितरेतराभाववद्भेदः द्वित्वादिसंख्याविशिष्टज्ञानं विवेक इति चेन्नामास्मपदं तेनेतिगोदं तु योक्तकार
कत्वपोऽख्यातिविवेकभ्रमस्यान्नत्राप्यानुषंगपाकं भेदाद्वित्वानमस्तीति चेत् इदमिति रजतमिति वेलाप्यपुनरुक्तशब्दानु
पत्त्राकारशून्यावभासे द्वित्वाद्यवगमो विद्यत एवान्यथा सामान्याकारशून्यविशेषाकारस्यावबोधकानवभासादिदमित्येवस्या
तरजतमित्येव वा। नेदं शुक्तिमित्येव वा। नेदं रजतमिति। किं च प्रतीयमानाकारयोर्न विवेकोऽनवकॢप्तप्रतिभासात्प्रती
यमानाकारविवेको न भ्रमोऽतिप्रसंगात् तस्मान्नाविवेको भ्रमः। किं च त्वं तु गोरित्यादिप्रत्ययाश्चाविविक्तानेकप
दार्थविषया विभ्रमाः प्रसज्येरन्। न च ग्रहणस्मरणाविवेक एव भ्रमो इदं तु मनुष्य इति गृह्यमाणाविवेकस्य प्रमात्वात्सा
मान्यविशेषयोः संसर्गज्ञानमेवास्तीति चेत्तथाप्यविविक्तानेकपदार्थज्ञानाद्भ्रमत्वमपि स्यात्। न च तत्र संसर्गग्रहणयो
पि एकस्य तदालंबनस्याभावात्। गुणगुण्यादिसंबंध एवालंबनमिति चेन्न प्रत्यभिज्ञायामेकालंबनत्वादिहा
पि च सामान्यसंबंध एवेदं रजतमिति संसर्गग्रहणालंबनस्यात् शुक्तिः सामान्यविशेषादीनामिदं रजतमयोरविवे
कग्रहणयोग्यत्वेऽप्यनुपपन्नमिति विवेकाग्रहणमात्रम्। किं च ग्रहणमेव स्मर्यमाणात्तस्मादर्थं किं न विविंच्यात् विशेषदर्श

नाभ्यागारेति चेद्गृहीतमात्रस्य जनताहेतोस्ति तदाभेदापेक्षितो विशेषो धर्म्याकारः प्रतियोग्याकारो वा नान्य इति गृहीत
एवभेदाकारो विविक्तः प्रमीयते। अथ धर्म्मिप्रतियोग्याकारौ गृहीतेपीतरेतरापेक्ष्यात् तृतीयमेव ज्ञानं भेदं ग्राहयतीति॥
तर्हि सर्वपदार्थज्ञानानां भेदग्रहणात्प्रागविविक्तत्वात् भ्रमत्वप्रसंगः। अथ तद्गृहीतमात्रस्य जनताहेतुः तर्ह्यैक्यमेवे
ति संसर्गज्ञानस्य सालंबनतासिद्धिः। किंच स्मृतिर्वा गवयादिस्मृतिवद् प्रमाणान्तरार्थकमिति न विविंच्यात् स्मरणा
भिमानप्रमोषादिति चेन्नेत्याह॥ कोयं स्मरणाभिमान इति। न तावत् स्मृतिरेव तस्याः प्रमोषे ज्ञानस्यैवाभावप्रसंगात्। ता
स्मृतेरन्यश्चेत् तत्र कथमन्यस्य प्रमोषे परिशिष्टमनुभवज्ञानं स्वकार्यमर्थविवेकं न कुर्यादथायं स्मरणाभिमानो दृश्य
तद्भिभावः। ननु सर्वानुभवतद्देशकालानामन्यतमेन सहैकाकारेणोपस्थापनादस्य संभेदः स्मरणाभिमान इति म
स्याहंतात्वत्तानानुविद्धतया ग्रहणमिति। सोयमिति प्रत्यभिज्ञाभ्रमे हि सर्वेषामेवैषां सहैकाकारस्य पूर्वानुभव
देशकालानां च स्मरामीति पर्यन्तानां संभेदावगमेपि गृहीतग्रहणमात्रेणाविवेकदर्शनादिति भावः। न च पूर्वानुभवसंदेहः ६७
स्मर्यमाणे संभवतीत्याह नह्यतीतेत्यस्येति अर्थस्मृतिसंस्कारस्य जनकं यत्पूर्वविज्ञानं तत्सव्यपेक्ष्यास्य विशेषण २०

याहत्वेनैव विषयी क्रियतेऽर्थमात्रविषयत्वात् सर्वज्ञानस्य न हि सर्वज्ञानेनाविषयीकृते विषये तत्संस्कारजन्मा स्मृति
रुपपद्यते तस्मादर्थमात्रविषयज्ञानजन्मा स्मृतिरर्थमात्रमेव विषयीकरोति न सर्वज्ञानेनाविषयीकृतं ज्ञानम
प्यन्यथा नीलज्ञानात् पीतेपि स्मृतिः स्यात्। ननु स्मर्यमाणे पूर्वानुभवसंभेदः स्यादनुभवसिद्धः सत्यं यत्र पूर्वानुभव
समयेऽर्थावभासलिंगजन्यमर्थज्ञानसद्भावविषयमनुमानमुत्पन्नं तदनुमानज्ञानसंस्कारजनिता स्मृतिरनुभव
संभिन्नमर्थमवगमयति। सर्वज्ञानेनाप्यर्थज्ञानविषयेऽगोचरे विशिष्टार्थविषयीकरणात्। यस्मादर्थस्मृतिरमनेनरमनु
भवविशिष्टार्थस्मृत्यंतरजननादर्थस्मृतिरेवानुभवसंभिन्नेति विभ्रमः। तस्माच्छुद्धमेवार्थमित्युपसंहरति। शुद्धमिति विष
यीज्ञानेन यावन्मात्रं वस्तुमात्रं वा स्वसंज्ञानसंभिन्नं च वस्तु विषयीकृतं तावन्मात्रमेवावभासयति न स्वसमूलज्ञानसंभिन्न
मित्यर्थः। नन्वर्थस्मृतिर्वा ज्ञानसंभिन्नार्थविषयस्मृत्यंतरं वेत्यत्र को विवेक इति चेच्चोदाहरणमाह। तथा च पदार्थस्मृ
विनिश्चितिव्यतिरिक्तकार्यांतराभावात्। नन्वस्मृतिजननसामर्थ्यसंबंधादेवे वाक्यार्थप्रत्ययविरुद्धा यावदंतपरा
हेतुकारणपर्यविषयाः स्मृतय इत्यभिहिता न्यपदादिनामविज्ञाभिधानवादिनावसंमतं। ननु कोसौ शब्दस्यार्थे

रिसमाभिस्तावत्क्रमेणोच्चार्यमाणेषु पदेष्वेकैकस्मात्पदादेकैकार्थविषयाभिज्ञानान्युत्पद्यन्ते। नाप्यसंबंधिशब्दस्य
नात्संबंधांतरार्थविषयाःस्मृतयस्संभिहितान्वयवादिनामन्विताभिधानवादिनां च संमते। ननु कोसौ शब्दस्यार्थेन संबं
धो यतः शब्ददर्शनादर्थस्मृतिरुत्पद्यते अर्थबुद्धिजननसामर्थ्यलक्षण इति चेत् किं स्मृतिजननसामर्थ्यलक्षणोन्यो वा।
न चान्यः पदानां पदार्थेषु स्मृतिव्यतिरिक्तकार्यांतराभावात्। न च स्मृतिजननसामर्थ्यसंबंधादेव स्मृतिजन्मान्यत्र
सादृश्यादिसंबंधांतरेण समन्यतरदर्शनेन्यतरस्मिन्स्मृतिदर्शनात्। तस्मान्न शब्दादर्थस्मृतिरित्युच्यते। संबंधज्ञान
संस्कारः शब्ददर्शनेनोद्बुद्धस्मृतिहेतुः नार्थेन संबंधविशिष्टशब्दज्ञानं। येन विशिष्टे स्मृतिसामर्थ्यव्यवस्थापनाद्विशेष
णमस्तु संबंधांतरमिष्यतां। संबंधविशिष्टान्यतरदर्शनादन्यतरस्मृतौ संबंधविशेषणत्वेनान्यतरस्यापि स्मृतिविष
यस्य प्रागेवोद्बुद्धत्वात्सादृश्यादिमूलसंबंधानां बुद्धिसामर्थ्यलक्षणत्वाभावात्सामर्थ्यसंबंधादर्थांतरत्वं न विरुध्यते
बुद्धिसामर्थ्यसंबंधाद्बुद्धिर्नोत्पद्यत इति वस्तुवचनविरोधः। तस्मात्पदेभ्यः पदार्थमात्रेषु बुद्धिसामर्थ्यसंबंधात्स्मृतयः एम
भिसिद्धं। कुतः पुनस्तत्त्वज्ञानसंभेदाभाव इति तदाह। ज्ञानस्यापीति। शब्दसामर्थ्यविषयतयाऽसंबंधित्वेन स्मृतिविष २०

षयत्वेज्ञानस्यापिशब्दार्थत्वप्रसंगादिति॥ तथेष्टमन्नागविषयेत्यादिस्पष्टार्थः। ननुस्मृतिज्ञानस्यविकोणत्वाद्वितस्व
गमः कश्चिद्विशेषोदृश्यतेसस्मरणाभिमानइतिनेत्याह नापिस्वगतोज्ञानस्येति। ननुनित्यानुमेयेपिलिंगविशेषा
द्धेतुविशेषानुमानंपृच्छमिति कोसौलिंगविशेषः नतावद्ग्राह्यविशेषइत्याह। नापिग्राह्यविशेषनिमित्तकइतिज्ञुल्ल
नहिफलविशेषोलिंगविशेषइत्याह। नापिफलविशेषनिमित्तइतिननुस्मरामीत्यनुभवस्मरणाभिमानइत्य
तआह। यः पुनः कश्चित्कदादिति। यदिस्मृतिस्मार्यस्मर्तृविषयत्रयानुषक्तोऽयमनुभवविशेषस्तत्स्मरामीति
यदिवाचितपविषमनुमानज्ञानान्तरमेतत्तुमयथापिग्रहणादित्रितयात्स्मरणादित्रितयस्यभागेत्वभेदावगमम
तरेणग्रहणादित्रितयशब्दस्यानतिरिक्तस्मरणादित्रितयशब्दानुमानव्यतिरेकेणानुमानन संभवति। विशिष्ट
मिथेषावगमनीमित्तत्वाद्विशिष्टशब्दानुस्मरणस्य विशिष्टावगमानुमानस्यचेतिप्रागेवस्मरामीत्यनुभवात
द्ग्रहणस्मरणयोर्भेदोवक्तव्यइतिभावः। ननुस्मृत्यनुभवयोरर्थमात्रविषयत्वेकोभेदइत्यतआह। तस्मादिति
कारणविशेषादेवतेदइत्यर्थः। कथंवालवस्मृतेज्ञानानुमानस्यवार्यविशिष्टज्ञानविषयत्वेसमानेविभाग

वगमः। कारणभेदादिति चेदिहापि तत्समानं। स इत्याकारेण स्मृतिर्ज्ञानानुमानाद्भिद्यत इति चेत्। कोयं स इत्या
कारः परोक्षदेशकालविशिष्टत्वमिति चेत्। अनुमानादिष्वपि प्रसंगः। स्पर्शानुभवसंभिन्नत्वमिति चेत्। ज्ञानानुमानयो
रुभयपरवाक्यजन्यज्ञाने वा प्रसंगः। तस्मात्संस्कारजन्यत्वं स इत्याकार इति वक्तव्यं। तर्हीहापि तथाविधैव स्मृतिर्दूरा
रूपमेव विज्ञानस्य किं न स्यादिति पंथां तिज्ञानमपीत्युपसंहरति अतो नाम संप्रयोग इति। न चेत् स्मृतिः। किं तर्हीदं रजत
मिति त्वन्यथाख्यातिरेषा। तथाहि। शुक्तिकासंप्रयोगे दोषोपहतमिंद्रियं देशांतरादिगतं रजतमपि गृह्णाति।
तेन स्वदेशाद्यवस्थितं दोषोपहतेन्द्रियेण गृह्यमाणं शुक्तिकात्मना गृह्यते। नन्वनेन त्वसन्निकृष्टमपि यत्किंचिद्दोषो
पहतमिंद्रियं किमिति न गृह्णाति। सादृश्यादिदोषसामर्थ्यादिति वदामः। तस्मादग्रहणात्मकमन्यथाज्ञानमन्य
थाख्यातिरिति। उच्यते। केयमन्यथाख्यातिः। अन्याकारं ज्ञानमन्यालंबनं वा। वस्तुनो वस्त्वंतरात्मनावभासो २२
वान्यथापरिणामो वस्तुनि ज्ञानं वा। न तावत्प्रथमः कल्प इत्याह। नन्वेवमसंनिवेपरीत्यमिति। कुतो वैपरीत्यमित्यत आ
ह। नैतत्संविदनुसारिणामिति। सर्वत्र यदाकारं संवेदनं तदेवालंबनमिति नियमेन रजताकारसंवेदनविरुद्धं शुक्तिका

लंबनत्वमित्यर्थः। ननु न संविदाकारतालंबनता सर्वत्र किं तु संविद्प्रयुक्तव्यवहारविषयतेति बोधयति। ननु युक्तेः स्वरूपे
ण दीति। इदं तावदयुक्तं न हि व्याघ्रसर्पादिज्ञानाद्दंडादिधादीयमानेषु व्याघ्राद्विज्ञानस्य दंडाद्यालंबनं। न च वक्तव्यं यु
णाद्विज्ञानप्रयुक्तत्वाद्व्यगुणं छपादीयमानेषु घटादीनामन्योन्यज्ञानालंबनत्वं प्रसिद्धं। तस्मात्तदाकारतैवालंब
नमिति न साकारज्ञानमस्यालंबनमन्यथाख्यातिरिति बहिरेवोपसंहरन्नयं। अस्तु तर्हि वस्तुनो वस्त्वंतरात्मना। वभा
स इति। तत्राह। यत्तथारूपावभासनमिति। न तावदस्यात भेदवादिनो संसर्गः परमार्थः। तं तेष्वानिर्वचनीयानभ्युपग
माच्छन्नप एव संसर्गप्रकाशे तेन खंडो गौरित्यादिसंसर्गप्रत्ययाः सर्व एव विभ्रमाः प्रसज्येरन्निति। बहिरेवैषयन्नेः प्र
तिवक्तव्यः। अथ भेदाभेदवादात् संसर्गमस्य तात्त्विकं ब्रूयात्तत्राह यद्यपि पारमार्थिकमिति। खंडो गौरित्यादिवत्सर्वस्य
भेदाभेदात्क्वचिदपि भ्रांतिबाधौ सर्वत्र न स्यातामित्यर्थः। अस्तु तर्ह्यन्यथा प्रतिपत्तेरेव वस्तुनि रूप्यातिरन्यथा
ख्यातिरिति तत्राह यत्युक्तेरेवेति। युक्तेः परिणामनिराकरणग्रंथस्य स्पष्टार्थः। अथ पुनर्दुष्टकारणजन्यायाः प्र
तीतेरित्यादिनान्यथाख्यातावेव परिणामप्रकारस्यैवो निराकृतिमात्रं त्वान्यतरनिराकरणं वा कथमत्राभीष्टं। अस्यख्या
ति वादी बुद्धेरेव रजताकारः। न वा हि रितिकुतः संप्रयोगे व्यतिरेकेण परोक्षवान् बुद्धिवत्। कथं विज्ञानस्य रजताका

२३ प्राप्तिः संस्कारस्सामर्थ्यादिति वदामः। तथाह्यस्य ज्ञानसंतते। यदा कदाचित्पूर्वं रजतज्ञानमुत्पन्नं तदेतत्संस्कार उत्प
न्ते। न च विज्ञानजन्योऽसौ वासनापि वस्त्वायान्तरालिकोवान्यः कश्चिदस्य संस्कारो विद्यते विज्ञानमात्रवादात्। स्वानेकज्ञा
नव्यवहितोपि कदाचित्सजातीयं रजतज्ञानांतरमुत्पादयति। शालिबीजमिवानेकांकुरादिकार्यव्यवधानेन पुनः
सजातीयबीजांतरमिति। अथवा तज्जन्यज्ञानसंतानस्यैव संस्कारः। स एव तथाविधज्ञानांतरादित्यनादिवासनाप्रा
प्तिं रजतं बुद्ध्याकारो वहिर्विदलमासत इति सर्वत्रैवमः। किं तद् रजतं ज्ञायते नवा। नचेज्ज्ञायमानज्ञानस्य रूपं न स्यादा
काशवज्ज्ञायते चेद्वाह्यार्थान्तराभावात्। अथ ज्ञानात्मैव दुष्टकारणजन्याद्रजतो स्यादिति तदा यथ पुनर्दुष्टकारणज
न्यायाः प्रतीतेरेव रजतो स्यादितीति। जनकप्रतीतेरजतो पूर्वकालत्वाद्भिन्नविषयत्वात्प्रतीत्यंतरस्यादुष्टकारणस्य २४
तद्विषयत्वे सर्वप्रतीतितिविषयत्वप्रसंगात् दुष्टकारणप्रतीते श्वरणप्रतीते श्चारजतस्तज्जन्यतया तदालंबनेव २५
वे रजतस्यार्थक्रियावत्तयासत्त्वप्रसंगात् तज्जन्यत्वे तद्विषयत्वाभावादप्रतीतमेव रजतं स्यादिति भावः॥ ॥ ०८ २६

त्रुटीतं पत्रमेकं

अन्यथाख्यातिं निराकृत्याख्यातिवादी स्वपक्षमुपसंहरति। तदेवं पारिशेष्यादिति। आख्यातिरूप
णामख्यक्रमनुस्मारयति। ननु न स्मृतिर्नापि ग्रहणं वेदनौ किंकामिदं ज्ञानकथमिति चोदयति॥
कालहिंगतिरिति। किं स्मरणमपं पृच्छसि किं वा ज्ञानमथ विषयमिति। यदि स्मरणमपं तत्राह नेंद्रियज्ञा
नादित्यादिना नचेंद्रियसंस्कारौ वै सामग्री समग्रकं ज्ञानमेवेदं स्यात् स्मृतिग्रहणं वेदितिचो
दयति कथमेतदिति। दोषसहकृतत्वात् तृतीयमिदं सौमग्र्यमित्याह। उच्यते। कारणदोष इति। न
नु दोषः प्राप्तकार्यस्य प्रतिबंधको नाधिकस्य हेतुरिति तत्राह कार्यगम्यत्वादिति। नवमादेः कार्यानु
दयस्य हेतुर्दोषः कल्पाभावात्। किंतु प्राप्ता दिवाद्विपर्ययकार्यहेतुर्दोष इति। ननु दोषः संस्का
रोद्बोधकत्वेन सामग्र्यामंतर्भवती तिन तृतीयमिदं सामग्र्यमिति तत्राह तातः संस्कारदुष्टकारण
संवलितेति। अथ ज्ञानस्यैकत्वं बोध्यते तत्राह सामैकमेतद्ज्ञानमिति। नान्विदमासंप्रयोगादंतःक
रणपरिणामज्ञानमेकमुत्पद्यते न तद्ज्ञाततत्स्मर्त्तव्या विषयीकर्तुमीष्टे मिथ्याख्यातं निदे

शांतरादिगतेर्वा संप्रयोगानुपपत्तेश्च चक्षुरुन्मीलनान्वयव्यतिरेकयोरधिष्ठानज्ञानोपपत्त्यान्य
थासिद्धेः नापि संस्काराज्जातं शाब्दागमःस्मृत्यनभ्युपगमात्। नापि दोषः स्वयमेवैकस्य चित्तज्ञानस्य
हेतुर्दृष्टः ज्ञानकारणानामेव कार्यविशेषनिमित्तत्वात्। ततो न रजतज्ञानं तत्संभिन्नशुक्तिविषयमेकं ज्ञानम
स्ति। किं त्वविद्यैव बाह्यदोषनिमित्तकारणापेक्षया रजताकारेण साक्षिचैतन्यस्य रजतावच्छेदज्ञानाभा
साकारेण च परिणममाणा स्वकार्येण सह साक्षिचैतन्यस्य विषयभावं प्रतिपद्यत इति तेमतं। तत्र कथ
मेकज्ञानत्वमिति तत्राह। एकफलमिति। विषयावच्छिन्नं हि फलमवभासस्तेन ज्ञानावच्छिन्नं विषयस्य
सत्यमिथ्यावस्तुनोरन्योन्यात्मतयैकतामापन्नं स्तेनैकविषयावच्छिन्नफलैकत्वोपाधौ सत्यमिथ्या
ज्ञानद्वयमप्येकमित्युपचर्यत इति भावः। अथ विषयः कथमिति तत्राह तस्य चेति। कुतो रजतज्ञा
नस्य मिथ्यात्वमित्यत आह तेन मिथ्यालंबनमिति। भावाभावज्ञानयोर्मिथ्यात्वप्रसिद्ध्यभावादि २६
दं ज्ञानस्य मवापि मिथ्यात्वमनिर्वचनीयार्थतामेवगमयतीत्यर्थः। संप्रयुक्तेऽर्थे संप्रयोगो निरपेक्षो

ज्ञानकारणं संस्कारश्च पूर्वानुभूतस्मृतौ निरपेक्षौ । तत्रश्च निरपेक्षकारणद्वयजन्यत्वात् ज्ञानद्वयमे
कनिरंतरोत्पन्नमित्यख्यातिवादी चोदयति । भिन्नजातीयज्ञानेति । ज्ञानभेदो हि द्विनिरंतरोत्पन्नावपि नपश्यति
कार्योदयः संभवति । तत्र यथा वर्णज्ञानेषु क्रमवर्तिषु ज्ञानकार्योदयान्यथानुपपत्त्या पूर्ववर्णसंस्कार
सहितमन्त्यवर्णज्ञानमेव हेतुत्वेन कल्प्यते कारणायौगपद्याय । तथा च वृत्तिकार्यानुपपत्तिरेव ज्ञानैकं
कल्पयति किं कारणभेदेनेति परिहरति नैष दोष इति । ननु कारणभेदात्कार्यभेदोऽप्यनुमीयत इति । ने
त्युदाहरणमाह दृश्यते हीति । ननु तत्रापि कारणभेदात् ज्ञानभेद इति नेत्याह । उभयत्रापीति । ननु लिंग
दर्शनं व्याप्तिस्मृतिश्च लिंगिज्ञानकारणं न संस्कार इति नेत्याह । संस्कारा बहवोष इति । ज्ञानद्वययोग
पद्याभावादित्यर्थः । तस्मादित्युपसंहरति । ननु प्रत्यभिज्ञायां संप्रयोगात् पूर्वानुभूतस्मृतिश्च कारणं ज्ञान
द्वययोगपद्यप्रसंगाभावान्न संस्कार इति तत्राह्ययमेव च न्याय इति । ज्ञानात् ज्ञानांतरोत्पत्तौ व्याप्त्या
द्यभावात्संस्कार एव कारणमित्यर्थः । ननु प्रमाणांतरेष्वपि निरपेक्षकारणसमाहारेणापि ज्ञानोत्प

इति। ननु यत्र संस्कारः प्रमाणकारणेन संबध्यते। तत्र स्मृतिगर्भे प्रमाणज्ञानमेव दृष्टं नेन येदं रजतज्ञानमिति तत्राह लैंगिक
विवर० हेऽभिज्ञाप्रत्यक्षे वेदं रजतज्ञानमिति तत्राह। तथा भिन्नजातीयज्ञानहेतुत्वस्येत्यादिना। किंच ज्ञान ज्ञाने २१
द्वयपक्षेऽप्यात्मापरोक्षावभासिनः स्मर्यमाणत्वेऽसर्वत्र प्रतिपन्नोपाधौ विषयसत्त्वाभावेऽन्यथाख्या
२२ तौ प्रतिपन्नस्य संसर्गस्य शून्यत्वे पुरोदेशप्रतिपन्नस्य रजतस्य देशांतरसत्त्वे वात्मख्यातौ बहिरवभा
सस्यांतरत्वे वानुभवविरोधस्यात्तथाख्यातिमते इत्याह। एवं सति नानुभवविरोध इति। ननूक्ताप्यसौ
तिप्रतिपन्नस्यानिर्वचनीयत्वेऽप्यनुभवविरोधः समानः तत्राह इदंतासंसर्गवद्रजतस्य शुक्तिकासत्ता
संसर्गोऽप्यवभासते। नेरजतस्यापरं सत्त्वं। अथवा त्रिविधं सत्त्वं परमार्थसत्त्वं ब्रह्मणः। अर्थक्रिया
सामर्थ्यसत्त्वं मायोपाधिकमाकाशादेरविद्योपाधिकसत्त्वं रजतादेरिति। परमार्थसत्त्वापेक्षया
निर्वचनीयमिति नानुपपन्नोऽयमंशः परांतरेऽप्यनुभवविरोधोपन्यस्तज्ञानद्वयपारोक्ष्यस्मृतित्वस्य २२
रणाभिमानस्य प्रमोषतद्भेदाविवेकनिमित्तप्रवृत्तयोर्जन्मांतरानुभूतस्मृतिश्चेत्प्रतिपन्नमपूर्व
वज्रकल्पमख्यातौ अन्यथाख्यातौ वा नप्रतिपन्नस्यात्यन्तसत्त्वमिंद्रियस्यवजन्मांतरानुभूतदे

शकालव्यवहितार्थग्राहित्वं दोषस्यैव तथाविधादृष्टसामर्थ्यसंसर्गस्यैव स्वप्नस्य प्रत्यक्षत्वं नेति प्रमाण
विरुद्धं बहुकल्पनीयं। अतः सर्वदोषपरिहाराय यथाप्रतिपन्नस्य मिथ्यात्वं नैकः स्वभावो ना
स्ति रजतं मिथ्या रजतं मिथ्यैव रजतमभादिति प्रबुद्धमनसिद्धः समाश्रयणीयो ऽविद्योपादानकल्पनाया
श्चान्वयव्यतिरेकसिद्धत्वादित्याह। अतो मायामयमिति। रजतस्यैव स्वतो मिथ्यावस्तुतः संभेदो ऽवभा
समानो माया मिथ्यानिर्वचनीयत्वप्रतिरूपास एवायमित्यर्थः॥ ॥ अत्र केचिदाहुः। अतो वि
द्यामयमिति वक्तव्यं न मायामयमिति। विक्षमाणानत्वबुद्धाननिराकार्यतया ऽविद्यात्मकत्वान्मायाऽ
विद्ययोर्भेदात् तथाहि। माया स्वाश्रयमव्यामोहयंती कर्तुरिच्छामनुवर्तते न तथाऽविद्यात्मकत्वा
न्मायावि प्रसिद्धश्च मायाविद्ययोर्भेदो लौकिकानां। न हि मायाविनिर्मितहस्त्यश्वरथादावविद्या
शंकाबुद्धतनुइति। उच्यते। लक्षणभेदाल्लौकिकव्यवहारसामर्थ्याद्वा भेदः कथ्यते। न तावल्लक्ष
णाभेदोऽनिर्वचनीयतया तत्त्वावभासप्रतिबंधविपर्ययावभासलक्षणस्याविशेषात्तन्मुमंत्रौषधादि

विवर
२८

सत्यं वस्त्वेव माया नानिर्वचनीया। न परिदृश्यमानमिथ्यावस्तुन्येव मायाशब्दप्रयोगाभावाद्॥
मंत्रादेश्चकाचादिवन्निमित्तकारणत्वात्। अध्यासोपादानाविद्या तु शिवत्काद्दाविकमायोपाद
नानिर्वचनीयानात्विस्तुकल्पनात्॥ तत्र च मायां तु प्रकृतिमिति श्रुतौ मायाशब्दप्रयोगात्प्रकृ
तिरूपत्वयोर्मायाविद्ययोर्विक्षेपकारस्योश्चाधाध्यासमात्रयोर्लक्षणाभेदादेकमेवगम्यते। ननु स्वाश्रयव्या
मोहाव्यामोहहेतुत्वाभ्यां लक्षणभेदो दर्शितः यद्याश्रयोऽद्वष्टव्यामुह्यत्येव पार्श्वस्थो मायां प
श्यन्न थकर्त्तानितस्पमायाविद्याद्यामोहाभावः। किं त्वाधनिश्चयप्रतीकारज्ञानाभ्यां॥ अन्यथा
पार्श्वस्थवत्कर्त्तापिव्यामुह्येदेव॥ अथैवयाकर्त्तुंशक्यते माया न तथा। विद्येति। नन्वदपि मंत्रौष
धादौ निमित्तकारणे कर्त्तुः स्वातंत्र्यान्नमायायाम विद्यायामप्येतुल्यवद्दंभादिनादिवद्भकेशोड
का दिभ्रमाः मंत्रौषधादिनिषेवणात्स्वभ्रमभ्रमाः तत्त्वज्ञानेप्यनुवृत्तप्रतिभासाश्चकर्णोरिच्छयानि
वार्यते। न च शास्त्रव्यवहारान्मायाविद्याभेदस्तस्या मिथ्यानाद्योजनात्तत्वभावाद्रूपश्यंतेविश्व २८

रा

मायानिवृत्तिरित्यादिश्रुतौ सम्यग्ज्ञाननिवर्त्या विद्यायां मायाशब्दप्रयोगात्। तदुक्तं विद्यावि
ततां हृदयामिन्निविशते। योगी मायाममेयाय तस्मै विद्यात्मने नमः इत्यादिस्मृतौ मायाविद्य
योः सामानाधिकरण्येन तत्त्वज्ञानेन तत्सम्बन्धाभिधानात्। मायामात्रं तु कार्त्स्न्येनानभिव्य
क्तस्वरूपत्वादिति सूत्रे सूत्रकारेणाप्युपक्रमे मायाशब्दप्रयोगात्। भाष्यकारेणाविद्या मा
याविद्यात्मिका मायाशक्तिरिति तत्र तत्र निर्देशात् टीकाकारेणाविद्यामायाद्वयं इत्युक्त्
वा तत्संसिद्धिकारेणापि दमेदेयमविद्यामाया मिथ्याप्रत्ययकारणं इत्युक्तत्वात्। तस्माल्लक्षणै
क्या इह व्यवहारे एकत्वावगमादेकस्मिन्नपि वस्तुनि विक्षेपप्राधान्येन माया आच्छादनप्राधा
न्येनाविद्येति व्यवहारभेदः। इच्छाधीनत्वात् विपरीतेन वा व्यवहारभेद इति युक्तं मायाम
मिति। अस्तु तर्हि ब्रह्मणि प्रतिपन्नोपाधावेव यथा प्रतिपत्ति परमार्थसत्त्वकल्पना गौरवादिदोषप
रिहारादिति नेत्याह। अथ पुनरिति। नन्वकारणादोषवत्तामेव तद्दर्शयति नेत्याह यतो नहि

वि॰

ति तदभावेन नत्रेति सर्वत्रपरस्यार्थः ज्ञातइत्यर्थः। अत्रात्माश्रयाविद्यात्मकत्वेपि सर्वैरेवकल्प्ये
१९ तिनेत्याह मायामात्रत्वेइतिप्रसिद्धमायावादितिभावः। रूप्याकारावच्छिन्नसाक्षिचैतन्यस
माश्रितस्परजतस्यशुक्तिकासंभेदोप्यविद्यात्मकइतिसुखादिवदनन्यवेद्यत्वमितिभावः
।ज्ञानस्यैवभ्रांतित्वप्रसिद्धेरुपपत्तिः कल्पनालाघवात्तु भ्रमाभ्यामनुगृहीतामिथ्यार्थज्ञान
तांगमयती। उक्तमिदानींवाधकप्रत्यक्षं त्वयमेकरजतस्य मिथ्यात्वंप्रतिपादयतीत्याह। किं
कनेदंरजतमितीति। ननुप्रतिपन्नोपाधौरजतादेरभावबोधोबोधयतु तस्य मिथ्यात्वमि
तिबोदयतिकथमिति। प्रतिपन्नोपाधावभावप्रतियोगितयावभासतइतिप्रत्यक्षमित्याह।तेन
हितस्येति। बाधकज्ञानसिद्धस्यप्रतिपन्नोपाधावभावप्रतिपन्नोपाधावभावप्रतियोगित्वल
क्षणस्यमिथ्यात्वस्यपुनः स्वशब्देनपरामर्शोत्रबाधविषयोमिथ्यात्वमित्याह। नेदंरजतं १९
मिथ्येवेति। ननुदेशकालान्तरबुद्धिषु संवादपरिज्ञातस्यैवंबाधः संपत्स्यतइतिनेत्याह न २३

डु

वृतत्केन विद्रूपेणेति नेदं रजतं किं तु नेदं ज्ञानं बुद्धिर्वेति स्यात्परामर्शो न मिथ्यैवेति स्फूर्तिः
ग्रहणा। विवेकात्वाग्रहवत्याद्दावि वेत्यभिप्रायः। ननु कोयं बाधो नाम यद्यन्यथाधीर्नोन्मत्तप्रवृत्ति
निरोधस्तर्हि यत्र रजतादौ परिव्राजकादेः प्रवृत्ते रेवाभ्युदयस्तत्र बाधप्रसिद्धिर्न स्यात् प्रसिद्धश्च
तत्रापि बाधः न प्रवृत्तिविच्छेदो बाधः किं तु प्रवृत्तियोग्यताविच्छेदश्चेन्न पुनरर्पितत्वे व रजत विवेका
दन्यदा प्रवृत्तिदर्शनाद्योग्यता। विच्छेदो तुल्यकज्ञानाद्विप्रवर्त्तमानस्य सर्पभीरोरादिदर्शनेन प्रवृ
त्तिनिरोधे सर्पादिज्ञानाद्युदकज्ञानस्य बाधप्रसिद्धिः स्यात् इति विवक्तरयाप्रतिपन्नस्य विवेको बा
ध इति चेन्न। सर्वपदार्थेभ्यः प्रथममविविक्ततयाप्रतिपन्नेभ्यः पश्चाद्दितरेतराभावापेक्षपाभेदज्ञा
नं सर्वस्य बाधः स्यात् न च पदार्थज्ञानमेव भेदज्ञानं गृहीतमात्रस्य सति भेदेऽविवेकाभावप्रसंगा
दित्युक्तं। अन्यथा मनाप्रतिपन्नस्येतरेतराभावप्रतिपत्तिर्बाध इति चेन्न। शुक्लो घट इति प्रति
प्रतिपद्य घटस्पर्शो श्यामं न द्रव्यं गुण इति ज्ञानं सर्वत्र बाधः स्यात् न तथा प्रसिद्धिरस्ति। समानोव

सर्वत्रभेदाभेदाविरोधे कथं प्रतिपद्यभेदस्य प्रतिपत्तिः सर्वत्र बाधः स्यात्तत्त्वज्ञानस्य प्रसिद्धिर
ल्सिद्धं सोबाधः स्वपंचाणिकत्वात्। अर्थस्य वस्तं विद्धि क्रियस्यान्यस्य वाङ्गो नेनप्रध्वंसायोग।
त्। बाधस्य च लोकप्रसिद्धत्वात्। तस्मान्न बाधं पश्यामः। उच्यते। अज्ञानस्य स्वकार्येण वर्त्त
मानेन प्रविलीनेन वा सह ज्ञानेन निवृत्तिर्बाधः स्तथाविधानवबोध निवृत्तौ बाधप्रसिद्धेरिति।
स्मृतिरूपशब्देन कारणवितयाजन्यत्वमुक्तं।। तत्र कारणवितयजन्यो न्यस्यान्यात्मनाव
भासो लक्षणांत दितलक्षणं न व्याप्नोतीति विवादयति। ननु न व्यापकमिति। कथं लक्षणं शास्या
भावइतित्वाहन हि स्वप्ने ऽनितदाहान एवेति। तत्र वासऽजन्य स्मृतिमात्रत्वे भ्रांतिप्रसिद्धिर्
क्याद्विस्मृतिवन्नस्यादितिपरिहरति। नत्वानस्मृतित्वमिति। नचु कारण वितयाभावान्नत्र।
नातरमपीत्याह। ननु स्मृतिरूपत्वमपि नेति। कारणवितयजन्यत्वमन्यस्यान्यात्मनावभा ३०
प्रशेकारादिनि। संप्रयोगस्य कारणांशस्य। घिझ्वानां शस्पदाभावादित्यर्थः। कस्मात्हि स्वप्न ५ ५३

१४

संवसंपादयामीत्याह अत्रोच्यत इति। संप्रयोगाभावादपरोक्षावभासित्वाद्ग्रहणस्मृतिमात्रत्वेप
युक्तेश्चद्दनीयमिदं विज्ञानं स्वयमेवोक्ताध्यासलक्षणगमपितुं समर्थमिति वदितुं प्रकारान्तरं प
र्युदस्यति। इक्कमेतदिति स्वप्नप्रपंचो विपरीतप्रमात्रादिविज्ञानसाधनस्यांतःकरणस्य निद्रा
दिदोषस्य सर्वानुभवसंस्कारसहितस्य संप्रतिपन्नकारणत्वे तेयं न बाह्युक्तस्य निरूपप्रातिज्ञा
नमित्याह तदिह निद्रादिदोषोपप्लुतमिति कथं परत्र परावभास इति तत्राह तस्यैवेति। निद्रा
दिदोषसंस्कारोपप्लुतेनांतःकरणेन मिथ्याध्यासनिमित्तकारणेनावच्छिन्नचैतन्यस्याविद्या
शक्तिपुष्कलनिमित्तकारणसंसर्गादध्यासंप्रतिपद्यकालकारणानामापद्यमाना मिथ्यार्थालं
बनाकारेण विवर्तत इति चैतन्यमेवस्वाविद्यया विवर्तते। अतः स्वप्नस्य वस्तुनो मिथ्यावस्तु
संबंधांतःकरणावच्छिन्नेन यावाह्याधिष्ठानसंस्पृष्टं केवलस्यावच्छिन्नतयावाह्याधिष्ठान
भेदावभासलक्षणः परत्रपरावभासो विद्यत इति भावः। तथा जागरणेपि बाह्याधिष्ठानांशसंप

विवर॰ स्पृष्टांतःकरणावच्छिन्नतयावाह्याधिष्ठानसंस्पृष्टचैतन्यस्थाविद्याशक्तिर्वाह्याधिष्ठानसं
स्पृष्टरजताद्याकारेणविवर्त्ततइतिशुक्तिकावच्छिन्नचैतन्यंरजताद्यालंबनमितिवाह्यालं
३१ बनंरजतादिकथ्यते।सर्वत्रतुचैतन्यमेवसाक्षाद्ध्यासावच्छिन्नतयावाविभ्रमालंबनमिति
युक्तःपरत्रपरावभासइत्यर्थः।आकाशवत्सर्वविषयोपरक्ततयासर्वत्रावभासमान
मात्मानमनादृत्याहमित्येवावच्छिन्नमात्मानमुपादायचोदयति।नन्वेवंमत्पंतरेवेति॥
आत्मैवाधिष्ठानंवेदीदंरजतमितिवदहंनीलमित्येवस्वप्रपंचोभायादित्यर्थः॥निष्कृष्टा
हंकारंचैतन्यमात्रमात्मानमादायचैतस्यस्वविलासाभानाधिकरण्यावभासंसर्वत्रांगीकृ
त्यपरिहरतिकिंचाध्वृतेइति।पुनरप्यहंकारावच्छिन्नमात्मानमादायचोदयति।ननुविच्छिन्न
देशाइति।इदमितिपृथक्क्रियतइत्यर्थः।पृथक्त्वावभासोप्यंतरेचेत्याह।ननुदेशोपीति।अन ३१
वच्छिन्नचैतन्यसंस्पृष्टतयैवभेदावभासोपीतिभावः।पुनरप्यहंकारावच्छिन्नमादायाहंभेद स

इत्यपि प्रतीयादित्याह। त्र्यष्टमपीति निरस्ताभिसंधिरेव पूर्वसूत्रस्तुत्केदानीं सर्वत्रो वि
प्रसृतनचैतन्यं सर्वात्मनाप्रकाशमानमात्मानं स्पष्टीकुर्वन्नाह। नदोषो जागरेपीति प्रातिभा
सिकभेदमंतरेणावभासमानतो न भिद्यत इत्यर्थः। नन्वहमावच्छिन्नचैतन्यादन्यान्येव विषयगत
चैतन्यानि किं नस्युरित्यत आह। अन्यथा जडस्येति। स्वयंचैतन्यहीना विषया आत्मावगतिप्रका
शेनापि न संस्पृश्यंते चैतन्यमयात्मकान्ता इति संबंधावभासो न स्यादित्यर्थः। सर्वत्र चैतन्यावगुंठने
पि अहमिदमिति वात्मानात्मानौ विभक्तौ विविक्तप्रतिभासं कथमिति तत्राह। अयं तु नरीति। न
नु चैतन्यमेव सर्वत्रांतर्बहिर्भेदादिरूपेणावभासते चेत्कथं तस्याखंडाद्वितीयतेति। चैतन्यभेदोप
रागनिमित्तभेदमंतरेण स्वरूपभेदानवगमादित्याह। तस्यव निरंशस्येति। निरंशद्रव्यस्याणु
त्वमनंतत्वं वा स्यान्मध्यमपरिमाणं वेदं चैतन्यं सर्वत्रावभासते न च निरंशमध्यमपरिमाण
मिति परोपाधिपरिमाणं चैतन्यमित्यर्थः। जागरणे प्येवं किंतु वक्तव्यं स्वप्नस्य चैतन्याधिष्ठा

तिव नाव रत्यर्थः केवलस्य मनसो बहिः प्रत्यक्षसाधनत्वाभावात्। अथवेत्यंगीकरणावादोऽव्याप्तिं
परिहृत्येदानीं मिथ्याभासध्वांत्यविद्यापासिद्धाभवेप्पमस्यान्यावभासोविद्यमानइतिलक्षणास्या
३२ तिव्याप्तिमाह। कथंतर्हिं नामादिविधिरिति। अन्यस्यान्यात्मनाज्ञानमध्यासस्य लक्षणमित्यंतव्य
स्यान्यत्वमानसीक्रियेत्यतिव्याप्तिं परिहरति। सत्यं अन्नएवबोदनावशादिति। ननुज्ञानमेव
तत्रविधीयतइतिनेत्याह नहिज्ञानमिति। विधिजन्यपुरुषेच्छाप्रयत्ननिरपेक्षमेवसर्वेज्ञान
मेवतत्रविधीयतइति नेत्याहनहिज्ञानमिति। विधिजन्यपुरुषेच्छाप्रयत्ननिरपेक्षमेवसर्व
ज्ञानस्यपुष्कलकारणमानिक्षलोप्यनिष्टज्ञानदर्शनादतो विधानान्मानसीक्रियेतिभावः।
ननुस्मृतिज्ञानमित्यारभ्यतंके विदितपतः शाक्तनोयंथाः स्पष्टार्थः। नन्वध्यासेवादिविप्रतिपत्ति ३२
दर्शनानेकरूपेणालक्षणंअव्याप्तिं शक्यतइत्याशंक्याधिष्ठानाध्यस्यमानयोः स्वरू
पतत्वदेशकालविशेषेष्वेववादिनां विप्रतिपत्तिरन्यस्यान्यात्मनावभासमात्रेलक्षणेनविप्रतिपत्तिः।
१६

तद्वलक्षणं लौकिकसामान्यविशेषादिसंसर्गोपपत्त्यानांभ्रमत्वप्राप्तिपरिहारायसत्यस्यमिथ्या
वस्तुनःसंभेदावभासइतिवलादापततीत्यंगीकृत्यमनंतरारब्धपन्यस्यतितंकेविदित्यादिनाप्रथम
स्यासत्ख्यात्यन्यथाख्यातिविशेषयोर्द्वितीयस्यचख्यातेस्तृतीयस्यकस्तुकेःस्वाभाव्यानात्मना।
ख्यातिरितिशून्यख्यात्यन्यथाख्यातिविशेषयोरुपन्यासः।कल्पनामित्यस्यव्याख्या।विद्यमानस्यै
वावभासमानतामिति।यल्लक्षणमवादिष्मेतिपूर्वलक्षणशब्देनषष्ठ्यस्यसंबंधः।अख्यातिवा
दिनाभिमानसंसर्गज्ञानंसंसर्गाभिमानोवावक्तव्यइत्यभिप्रायः।ननुस्मृतिरूपत्वपाकारणनि
नपजन्यत्वमुपेक्षितमितिनेत्याहपूर्वदृष्टत्वेति।नन्वविद्यादिदोषपूर्वभ्रमसंस्काराभ्यामेव
पदार्थमात्रज्ञानानिजायमानानिविवेवसितमितिशून्यवादीमन्यते।तत्राहस्मृतिरूपःपूर्वदृष्ट
वभासइति।नपदार्थमात्रज्ञानंविभ्रमःशून्यज्ञानस्यापितथात्वप्रसंगात्।किंत्वन्यत्रान्यज्ञाने
भ्रमः।नसत्यंरूप्यकृततंसंप्रयोगादिप्रमाणाकारणंवापेक्षतेविभ्रमइतिपरत्रेतिपदस्यवि५५३

विव ततश्चाविभ्रमेपि पदार्थज्ञानेन लक्षणकाहेतोर्निरूपपत्तिका त्वमिति। कथं निरूपपत्तिकोपमित्या
दियं यः स्पष्टार्थः।। [illegible] कुसंविद्रजतयोरितरेतराधिष्ठानत्वेन साधिष्ठानभ्रमे संभवति नत्वत्री
३३ यस्य सत्यवस्तुनोधिष्ठानत्वकल्पनायुक्तेत्यिवोदयति। ननु रजते संविदिति। नत्वयस्यमानव्य
तिरेकेणाधिष्ठानस्यासिद्धेर्वक्तव्या तेनेतरेतराधिष्ठानत्वे स निष्ठं तरेतरापेक्षसिद्धिकत्वादसमंजसं स्यादिति
तत्राह बीजांकुरादिवदिति न बीजांकुरादिष्विवेतरेतराश्रयता किंतु कारणपरंपरयानवस्थेति परिहरति।
नेतत्सारमिति। नन्विहापि कारणपरंपरेति नेत्याह। इहापि नर्थस्यामिति। नन्विहापि तत्पूर्वरजते संविदंतं
तत्पूर्वस्यां संविदि सा च स्वविषये तत्पूर्वस्यां संविदीति परंपरामेव कल्पयामीति चेत् यदि तावत्पूर्वपूर्वमुत्तरो
त्तरस्यान्वितत्वेनाधिष्ठानं स्यात्ततः पूर्वस्य पूर्वस्योत्तरस्मिन्नक्षणस्य युगपदेवस्थानात् क्षणिकत्वहानिः
ननु बीजांकुरादावन्योन्योपादानत्वेपि नैव युगपदवस्थानं दृष्टमत आह। बीजांकुरादिष्वपि प्रतीत्य ३३
भिमतवस्तुसिद्धिरन्वयिकारणत्वसिद्धिः क्रमान्वितेषु बीजादिष्वन्वयिकारणाकांक्षायामनिष्टत्व

त्वादिप्यर्थः। अतोन्वयिद्रव्यमेवतत्राप्युपादानंबीजादेरन्यान्यनिमित्ततेतिभावः। इहापितर्हिस्वं
स्योन्तरंप्रत्यनन्वयित्वेनैवाभासनिमित्तताबीजवदितिनेत्याहकृतत्वमेवमितिपर्यनुयोगेदृष्टत्वाद
वमितित्रयंभावः। बीजांकुरयोःकार्यकारणभावस्यदृष्टत्वाद्दृष्टत्वेपितयोरेवकार्यकारणपरंप
राद्दृष्टिपरंपरात्वात्तावस्थादोषमावहतिसंविज्जतयोरधिष्ठाना। क्षिप्येयतस्यानिमित्तनैमित्तिकभा
वस्यप्रथममेवकल्पनात्तयोरेवंसर्वनिमित्तनैमित्तिकभावकल्पनात्त्वेषपरंपरैवस्यादितिदृष्टिपरं
परामेवदर्शयतिदृष्टत्वादेवमितितत्रैवहृरवेति। नानवस्थादोषमतिवर्त्तत इत्यंपक्षपरंपरामेवोत्पथ्यं।
द्याकारावभासात्वात्सर्वभ्रमाणांपरस्परावभासएवभ्रमस्त्वकेभ्रांतिज्ञानप्रतिपन्नविपर्ययेर्थेभ्रांतं
शांतराभावविशिष्टाशांतरज्ञानस्यबाधकत्वाद्वसाधिष्ठानोभ्रमइत्याहापिवनक्वचिदितिनिनन्व
नुमानाप्रवर्तनात्भ्यांसर्पाभावमात्रमपिकदाचिज्ज्ञप्तेनतदभावविशिष्टमंशांतरमितितत्राह्य
नाप्यनुमानादितितत्राप्यभावविशिष्टंवस्तुमात्रंगृह्यतेविशेषाकांक्षादर्शनादितिभावःसतुप्र

चि॰

भानं नास्तीत्यादौ न तदभावविशिष्टं वस्त्वंतरं गृह्यते तेनेयमन्यत्रानभ्यस्तत्वादिति भावः॥ प्रमातादिष्वपी
ति॥ अथवा सर्वभ्रमावभासेषु बाधावभासेषु च साक्षिचैतन्यस्यालंबनस्य विद्यमानत्वात्॥ शंकामा
न निरधिष्ठाननिरवधिकभ्रमबाधेपि साक्षी बोधाधिष्ठानमवधिश्च विद्यत इत्याह॥ अथवा सर्वलोक
साक्षिकमिति निरवध्यर्थबाधयाज्ञानस्यापि बाधाद्भ्रमबाधे तदवभासि साक्षिचैतन्यमपि बोध्योतनितत्रा
ह॥ तद्बाधे तदवशिष्टं ग एवेति॥ अधिष्ठानत्वेनापि परिशेषादिति भावः॥ अत्र शून्योपसंहारः तदेव प्रपंचय
ति तेन तन्मात्रस्येति साधिष्ठानभ्रमसाधनस्य संगेनाभ्रलस्यापि शून्यतां निरवछिन्नाभ्रस्तेमप्यसदिति श
न्यतातो रजतमिति विशेषप्रतिभासापोगप्रसंगादिति भावः॥ प्रतिभासमात्रनिराकरणे शून्यं न भासत
इतिवाक्यस्याबोधकत्वप्रसंगात्तत्वध्वंसे सर्वं शून्यमेवेति तेमन मिति त्वोदयतीति नन्विति शून्यात्मा
इतिरपि भ्रमस्य कथितेत्येत्याह॥ क एवमाहेति॥ सद्या॥ इति मानं भ्रमस्यामन्वंतामन शून्यत्वं निषेधश्रुति ३४
योगित्वादिति भावः॥ ननु भ्रमस्य स्वकाले अनिर्वचनीयत्वेपि बाधाद्दृष्टं शून्यत्वमविशिष्टमिति शंकते॥

ऽथ पुनरिति सर्ववादिनां सर्ववस्तुस्वकाले कर्त्तमानमपि विनाशादूर्ध्वं शून्यमेवेति संमतममतो नेदं
पुरःस्थं पाद्दकामभि भि। ननु भवन्नामसर्वस्य वस्तुनो विनाशादूर्ध्वं शून्यतानभ्रम गृहीतं वस्तु बाधादू
र्ध्वं शून्यं भवतो किंतु देशांतरादिगतमिति चेत्॥ तत्र किं बाधकज्ञानमेव रजतादेर्देशांतरे सत्त्वं गमयति
किं वेह भावोपपत्तिरिति। नतो बाधकज्ञानमित्याह। तथा न बाधकज्ञानमिति नेदं रजतं किंतु देशांतरे
बुद्धौ वेत्यनवगमादिति भावः। यावदभिधानं सामर्थ्यं हि वाक्यमर्थं प्रतिपादयति देशांतरवर्त्ति विमन
भिहितं न वाक्यार्थ इत्यर्थः। एवं सति प्रतिपन्नस्य वस्तुनोऽत्राभावोऽन्यत्र सत्त्वमंतरेणानुपपन्न इत्यर्थाप
त्यावाक्यं गमापिष्यतीति निराह। नार्थापत्तेति। अन्यथाख्यातौ निषिद्धस्य संसर्गस्यात्मख्यातौ बाह्य
स्य वान्यत्र सत्त्वमंतरेणा निषेधदर्शनादख्यातावपि विविक्ते देस्सर्वस्वदानकर्त्तव्यता बुद्धाविति य
विवेकांतरनिमित्तादक्षिणायागसमाप्ति विज्ञानबाधितायां न सर्वस्वदानकर्त्तव्यतात्र प्रतिपन्नान्यत्र
सतीति कल्पने प्रसह्यतिरेवतत्र निरुद्ध्यतरतिवेत्तन प्रहतिनिरोधेन बाध इत्फकत्वात्त्यागादिष्व

वप्रवर्त्तमानस्यराज्ञोवोराद्दिप्रतिबंधनिश्चयात्प्रवृत्तिनिरोधेपियागादिबुद्धिबाधप्रसिद्ध्यभावाञ्च
न्यं।वाबाधितकर्त्तव्यतोबुद्धौपदाकवादिप्रवृत्तिसिद्धेः।किंचलौकिकेपिप्रतिपन्नोपाधावेवयस्यनिषेधस्त
स्यप्रतिषेधेपाधिसजातीयोपाध्यंतरेसत्त्वेनकल्प्यतइत्याह।इहभग्नघटाभावदिति।यथाप्रतिपन्ने
रोनिषिद्धस्यघटस्यनदेशांतरेसत्त्वमेवंप्रतिपन्नदेशकालवस्तुसर्वोपाधौनिषिद्धस्यनप्रतियोगित्वे
नाप्रतिपन्नसर्वोपाधौसत्त्वसिद्धिरित्यर्थः।ननुकथंसर्वत्रशून्यस्यप्रतिपत्तिरितितत्राह।तन्मात्रे
णापितसिद्धेरिति।अत्रैवानिर्वचनीयमिथ्यावस्तुसद्भावमात्रेणापितस्याः प्रतीतेः सिद्धेरित्यर्थः
।ननुतर्हिपूर्वंरजतमभूदिदानींनेतिप्रत्यक्षवत्कालभेदेननिषेधध्वंसस्यात्रलौकिकपरमार्थरजतस्यात्रका
त्रयेपिशून्यत्वात्तदपेक्षयानिरुपाधिकनिषेधासिद्धेर्निरुपाधिकनिषेधसिद्धेर्निरुपाधिकविषेधसा
मर्थ्याचप्रतिपन्नंमिथ्यारजतमितिबाधानंतरंपरामृश्यतेमिथ्यैवरजतमभादिति।अन्यथाकालभे
देसत्यरजतमेवस्यात्तत्रायंसर्परत्यभावमात्रविषयाहिप्रत्यक्षप्रतिपत्तिर्निर्देशं।तदेसर्पसत्त्वंगमयति ३५

किंसुवक्तव्यंरजतमियमित्यधिष्ठानतिप्रवर्त्तवासितापतीतिर्नकल्पयतीतिदर्शयति यत्रापिसर्पबाधस्सर्वकर्थि
तत्त्वमित्याधकउपसंहारः। यद्येवंपरत्रेत्यादिस्फुटार्थः सम्यंविस्पष्टार्थमित्यस्यायमर्थः स्मृतिरूपशब्देन किं
संस्कारजन्यत्वंपूर्वानुभवेसंभेदोवास्मृत्यासादृश्यभ्रांतेरभिधीयत इतिविये संस्कारजन्यत्वमेवेति।
स्पष्टीकरणार्थंपूर्वदृष्टस्यावभासोन्यदर्शनस्यात्यक्तमिति पूर्वदृष्टरजतजातीयस्येत्यर्थो निर्वचनीयरजत
स्फपगमात्रश्रांतिश्चेअन्यस्यवस्तुनोमिथ्यावस्तुसंभेदावभासोन्यथातिश्रसंगादित्याद्यायाशुक्तिरभि
हितालोकानुभावसिद्धत्वादध्यासस्यनथा।पिशुक्तयानध्यासोज्ञानमित्याहतथाचलोकेनुभवइत्यादिनान
नुशुक्तिकारजतवदितिवचनंनश्रांत्यपेक्षयोपपद्यत इदंरजतमित्येवावभासबाधबाधापेक्षयातत्रवत्कार
णाभावादितिवोदयतिनचशुक्तिकेतिबाधकज्ञानापेक्षयाशुक्तिकारजतमवभासत इतिलक्षणाप्रदर्श
नेबाधकज्ञानविषयतयावानस्यासामर्थ्यनवासिद्धस्याध्यासमिथ्यात्वस्यलक्षणस्यवछेदेनाभिधानमितिल
क्षलक्षणासंगतिरन्नमवभाषत इतिलक्षणाप्रदर्शनेबाधकज्ञानविषयतयावानज्ञासमर्थ्यनवासिद्धस्या

ध्याम मिथ्यात्वस्य लक्षणस्य पक्षच्छेदेनाभिधानमिति लक्ष्यलक्षणसंगतिरनेन वाक्येन तत्र अदृश्यत्वे तइत्याह
उत्पन्ने शुक्तिकायां रूप्यमिति । ननु मिथ्यात्वं रजतमिति विशेषणादन्यत्र सत्यरजते न वक्तव्यमिति नेलक्ष्यल
क्षणसंगतिरनेन वाक्येन न तत्रेत्याह मिथ्यात्वमपि रजतस्येति स्वरूपपरं विशेषणं नान्यव्यावृत्तिपर
मित्यर्थः । ननु रजतस्य मिथ्यात्वे तद्धर्मत्वादिदंताया अपि मिथ्यात्वापत्त्यैव मिथ्यात्वेन निरधिष्ठानता
प्रसंग इति तत्राह तत्रासंयुक्तत्वादिति कथं तस्यासंप्रयुक्तस्य रजतस्यापरोक्षत्वमत आह स्वापरोक्षा
वभासास्त्विति । उदाहरणद्वयस्य तात्पर्यमाह तत्र शुक्तिकोदाहरणेनेत्यादिना स्वदर्थेहमितिप्र
तिभासइत्यर्थः । प्रतिभासते शुक्त्यादर्थत्वाभावेपि चिदवभासत्वं नामसंप्रयुक्तस्थले लक्षणमस्तीत्याह न
दवभासत्वेनेति । अद्वितीये चैतन्य एकात्मनि इच्छायद्वंकायदि संबातस्याध्यस्तत्वाद्ध्यस्यमान
व्यतिरिक्तमधिष्ठानं अध्यासाधिष्ठानयाथात्म्यविषयं प्रमाणज्ञानं दृष्टमेवेति तत्राह अस्मात्मेवेति वक्त: ३६
व्यं तत्राधिष्ठानगतदोषोद्भूतोपि प्रमाणाकारणगतदोषो वा सर्वदोषजातमात्मन्येवेति वक्तव्यं ।

तदभावाच्चेतनस्याध्यासविषयज्ञानस्यजन्यत्वात्। कारणत्रितयजन्यस्यविज्ञानस्यात्मन्यनात्माध्या
सेसंभवादगृहीतविशेषस्यसामान्यग्रहणस्याधिष्ठानत्वनिमित्तस्यात्मन्यसंभवाच्चपरत्वेनयोगात्त्राध्या
सलक्षणंबहिरित्युक्तमप्यात्मनिसंभवतीतिचोदयति। ननुवह्निरर्थेऽन्यादिनोक्तातदन्वितःप्रोक्तेनेनग्रंथे
ननत्विहापिबहिरर्थवदगृहीतविशेषत्वमर्थत्वसामान्यादनुमीयतामितिनेत्याह। नत्विहकारणांत
रापत्तेरिति। ननुस्वभावावभासेपिसंवेदनवदगृहीतविशेषांशोपिस्यादितिनेत्याह। निरंशस्येति। म
ध्यमपरिमाणनिराकरणादणुरनंतोवात्मानिरंशइतिननुनिरंशोप्याकाशादिवत्तेनकात्स्न्येनावभास
तइतितत्राह। स्वयंज्योतिष्ट्वइतियावदन्यमवभासमभावादित्यर्थः। अतोत्रायंपुरुषःस्वयंज्योतिरात्मैवा
स्यज्योतिरित्यादिश्रुतेः। ननुज्योतिरितिप्रकाशगुणमात्रंनाभिधीयते। आत्मनोगुणत्वप्रसंगादतःप्र
काशगुणवत्वंज्योतिरितिज्ञंन्यज्ञानेनापिप्रकाशेनात्माप्रकाशगुणोऽनिरंशोतिरात्येतिनविरु
ध्यतेनैतत्सारंसर्वभावानामन्यनिमित्तप्रकाशसंसर्गित्वादात्मन्यपितत्प्रसंगशेषणांकिन्नस्यात्तदसौ

विव॰
३

तिष्ठ स्यैव विशेष्यत्वात्तत्प्रकारकत्वस्य विशेष्यतया प्रतिभासनात्। किंच ज्ञानजन्मप्रयुक्तत्वात्कारकापे
क्षायाः तदभावेपेक्षैव नास्ति॥ ननु ज्ञानप्रयुक्तं जन्मापि विद्यते न प्रकाशगुणप्रयुक्तमेकस्य जन्मव्यति
रेकेण स्वद्रव्योपाधेर्जन्माभावस्य प्रदीपादिषु दृष्टत्वात्तद्वदत्रापि स्यादिति: शब्दादात्मनि प्रकाशगुणस्य ज
न्माभावनिश्चयात्तत्वतः करणेपि प्रकाशगुणोदयो ज्ञानपरिणामः। स्वभावत एव प्रकाशगुणवदन्तः
करणद्रव्यस्यैव विशेषपरिणामस्य ज्ञानत्वाभ्युपगमात्तत्र ज्ञानमपि क्वचिज्जन्मवद्दृष्टं दृष्टमन्त
:करणेऽस्तीति चेन्न। ज्ञातृत्वस्यार्थप्रकाशस्य ज्ञानत्वात्तस्य चात्माश्रयत्वादन्तःकरणपरिणामे ज्ञानोप
चारात्तत्र ज्ञानमात्माश्रयं वक्ष्यामि इत्युक्तं तस्यैव प्रकाशगुणात्मनोऽस्तीत्युक्तमात्रकृत्प्रकाशगु
णोत्पत्तिरिति चेत्प्रकाशत्वप्रयुक्तकार्यत्वात्स्वरूपोपाधेर्जन्माभावस्य दर्पणादौ विद्यमानप्रकाशस्यैव
निरोधकानिराकरणं क्रियते प्रदीपादिषु तदुत्पत्तिमेव जायते। प्रकाशगुणः प्रज्ञानघन शब्दाद्वेदेतन्नप्रकाशो ३०
तिरात्मा नज्ञोऽस्तीति गम्यते विज्ञानमानन्दं ब्रह्म प्रज्ञानं ब्रह्मेत्यादिवचनाद्ज्ञानमिति ज्ञातव्य

मुच्यते। तमभावार्थ इति चेन्न भावे प्रसिद्धिविरोधात्। अत एव तस्याकिंचित्त्वात्तरां प्रकाशगुणकल्पना दूरमेकसे
वगुणस्य तस्यापि विकल्पनं। आत्मनि प्रकाशगुणव्यतिरेकाभावाच्च नांगं उकात्वे प्रमाणमिति। नन्वात्मस्वरू
माणविशेषत्वमनुभवसिद्धमिति चोदयति। ननु ब्रह्मस्वरूपमिति तर्हि शुक्तिकायामिव ब्रह्मण्येवानव
भासविपर्ययौ स्यातां। न जीवस्य स्याहनै। न तदनवभासनादिति। ननु कार्यकारणभाववही न योर्द्वयोः साम
नाधिकरण्यं एकद्व्यनि छंसोयं देवदत्त इति वदतोऽद्वैकात्वात्जीवगतावेवानवभासविपर्ययावितिचेदेवं
ति। ननु न ब्रह्मणोन्य इति न हि ज्ञानप्रकाशविरोधादाश्रयविषयभेदाभावान्नाज्ञानं ब्रह्मण इत्याहुरेवं
तर्हीति। तस्माद्वितीयाधिष्ठानब्रह्मात्मनि प्रमाणसंपवेन न्यस्याविद्याकारणदोषसंसर्गप्रथमं दर्शयिति
उच्यते विद्यत एवेति। अस्पष्टानुमानार्थापत्तिप्रदर्शिताज्ञानस्पष्टनिति तदर्थापत्तिप्रपंचप्रदर्शनं क्रियते स्फु
तिस्तावदिति सुषुप्तौ मिथ्याज्ञानाभावात्तत्संस्कारस्य वा प्रतिबंधकत्वात्कादाचित्कग्रहणाभावस्य
स्वतः सिद्धग्रहणविरोधित्वाभावात्स्वरूपचैतन्येनैव ब्रह्मस्वरूपावभासे प्राप्ते तदवभासप्रतिबंधनिमित्त

मन्यजंदर्शयति। अन्यतेनहिप्रत्यूहाः तस्मैसन्ध्याकामा अन्यनापिधानाइति। ततश्चमिथ्याज्ञानतत्संस्कार
ग्रहणकर्मभ्योतिरिक्तमनवभासनिमित्तमन्यत् मिथ्यावस्तुसिद्धं। अनीशयाशोचयतिमुह्यमानइति
स्वभावसिद्धेश्वरस्यानीश्वरत्वंतद्भावापत्तिपत्तिरिवक्रुतेनपापाचरतश्चेश्वरभावापत्तिप्रत्नेः शोकस्यवनि
मित्तंमोहंदर्शयति। आदिशब्दानंतंविदाथयदस्माज्जन्मानादिकल्पशुभंतरंब्रह्मवनीहारेणप्रावृताजल्पा।
वासुतृपउक्थशास्मश्चरंतीति। नीहारेतमोऽज्ञानमिथ्यार्थ्योनरंतेनप्रावृताएवमेवजीवानांब्रह्मपरि
ज्ञानेजल्पवाग्ध्यासेवनिमित्तंदर्शयतितथाविद्यायामंतरस्वर्तमानानान्यश्चेयोवेदयंतइति। श्रेयोरू
पब्रह्मापरिज्ञानेक्रियाकारकाद्यध्यासेवनिमित्तंमूढतामविद्यांदर्शयतित्याद्याश्चज्ञानेकृतंज्ञानंतेन
मुह्यंतीत्याद्याः स्मृतयोपिद्रष्टव्याः। अर्थापत्तिरपिप्रमाणंब्रह्मज्ञानोद्देधनिर्विशेषस्मारणाद्वलक्षणप्रा
गनवबोधेअध्यासबंधहेतुरस्तीतिकल्पयतीतिफलश्रुत्यनुपपत्तिरथवादृष्टव्यइत्यादिदर्शनवि ३०
धानानुपपत्तिःप्रागनवगमममंतरेणेतिजीवस्यब्रह्मरूपानवभासनिमित्तंजीवाश्रयाध्यासबंधहेतुरज्ञा

नदोषो। विद्यानऽउक्तं अत्र वक्तव्या त्रिविधस्याज्ञानस्य प्रमाणैरभावव्याहृतिः प्रदर्शितेऽइतिनतस्यप्रमाण
वेद्यत्वप्रसंगऽइतितत्रचोदयतिनवुनजीवोब्रह्मणोन्यऽइति। किमत्रजीवब्रह्मणोरैक्याद्वा तत्पर्यंतु युज्यते॥
किमेकत्वादाश्रयविषयभेदानुपपत्तिः किंवा चित्स्वभावस्य विद्याश्रयत्वविरोधो ब्रह्मणो वा सर्वज्ञत्वा
द्विद्यानिरितिनतावदज्ञानमाश्रयविषयभेदापेक्षं किन्त्वेकस्मिन्नेव वस्तुन्याश्रितत्वमावरणत्वेतिरूपद्वयं
संपादयति। स्वाश्रयापवरकप्रदेशेद्वयसंपादितमेवदृक्क्रियात्मकत्वादावरणत्वाद्वनहितमेवमुद्भूया
पेक्षमवभासतेऽज्ञानमितिवद्वयापेक्षज्ञानपर्युदासेन। भिन्नानात्रयत्सापेक्षवदवभासते यथा स्थितिर
गमनशब्देन। विधीयमाना कस्य किंविषयमज्ञानमिति कर्मसापेक्षवद्वा। तेनद्रुत्तमोवत्स्वाश्रयावरणम
ज्ञानं स्वाश्रयैकत्वेन नविरुध्यते न। पि स्वाश्रयचित्प्रकाशेन नविरुध्यतेज्ञानं स्वावभासकेन संवेदनेन वि
त्प्रकाशेनाज्ञानस्याविरुद्धत्वात्साक्षिचैतन्यस्याज्ञानावभासकत्वात्तेन विद्याश्रयत्वविरोधः किंत्वज्ञ
स्वज्ञानेनात्मनस्तस्याश्रयेवभासमानएव स्वपरविषयज्ञानाश्रयत्वंसर्वज्ञोपगंतव्यमितिनावभासमा

नेश्वरज्ञानाश्रयत्वविरोधः। नव प्रकाशमात्रमज्ञानविरोधि स्वज्ञाने भावात् न च स्वयंप्रकाशमाने ज्ञानसं
सर्गविरोधश्चैकविदृष्टः विषयाणां परप्रकाश्यानामेव तत्संसर्गविरोधात्स्वं वेदनस्यात्मरूपत्वाद्देव तदाश्र
याज्ञानोपगमान्न तदुदाहरणं अथ ब्रह्मणः सर्वज्ञत्वविरोधाद्देकैक्ये सति नाज्ञानमुपपद्यत इति नजी
वाश्रयत्वोपगमान्नत्वेवमुक्तं सत्यं सत्यथैकोप्रतिदिवाम्मध्यस्तरूपाम्न्वादेविबेदर्शनात्। अक्षदा
ततायाश्चाविरोधदर्शनादेवं सर्वज्ञत्वाविद्याश्रयत्वयोरसत्यप्यैक्ये विरोधस्तस्यान्नैकांविरुध्यते। विद्या
श्रयत्वेन किं त्वविद्यामेवोपपादयतीत्याह। वाढमत एवार्थादिति ऐक्ये स्वयंप्रकाशत्वे ज्ञत्वे सत्येवानव
भासदर्शनादाह्लादिवाविद्याकल्प्यते ऽन्यथा भेदज्ञाद्य किंचि रज्ञत्वे ग्रहणाभावमात्रमेव स्यात्तत्त्वद
तनीहाराज्ञानार्हतत्त्वादिशङ्काऽनवभासाध्यासनिमित्त — वरूपाज्ञानप्रतिपादकाबाधेरन्निति तिनन्वे
कदृष्टत्वे सति जीवब्रह्मविभागः। किंनिबंधनो फलः सर्वज्ञत्वाविद्याश्रयत्वे व्यवस्थाप्येते ऽस्तंतःकरणा ३०
वच्छेदात्काश्चिद्भेदं वक्ति। अन्यस्य व्यतिरिकादपरस्तुस्वभावादेवांशांशिभावात्। सर्वं चावक्ष्यतीति। अतो

नादिसिद्धाविद्यावच्छिन्नेति। आत्मवरणमात्माज्ञानमेव जीवब्रह्मविभागाध्यासोपादानं स्पतेऽतो जीवच्छे
दनिमित्तमज्ञानमिथ्यावच्छेदस्यापि प्रसक्तिमाशंक्याध्यासस्य तदुपादानत्वात्स्यते। निरवयवस्याद्वैतेऽभावाप्रयोगा
त्। कर्तृभोक्तृत्वदोषसंयोगानीवीतांकस्य दर्शनाद्विवाहस्य दर्शितत्वात्तदुपादानमप्यज्ञानमनादीत्याह। अ
नादिसिद्धेति। अनादिजीवविभागाध्यासस्य वाहस्यानाद्यविद्यैव कारणं नांतःकरणादीत्याह। अविद्यावच्छि
न्नेति। नत्वांतःकरणमवच्छेदकमस्तु तोविदारणाभावाद्वच्छेदस्य विभ्रममात्रत्वाद् ज्ञानस्यैव तदुपादानत्वादं
तःकरणस्यैव सम्यक्ज्ञाननिरस्यतयाऽविद्याभासत्वात्स्वकारणावच्छिन्नस्यैवावच्छेदकत्वसंभवात्। त
त्वे पि सादेरनाद्यवच्छेदस्याधित्वाभावात्। सुषुप्त्यादौ चांतःकरणाभावादनवच्छेदप्रसंगाच्च। तदापि सूक्ष्मावस्था
मंतःकरणमवच्छेदकमिति चेन्न निरवयवत्वापत्तेः सूक्ष्मता सावयवस्यावयवाभावे स्वरूपनाशाद्व्याक्य
वापचयमात्रं सूक्ष्मता। नवस्थितावयवत्वेनो कार्यत्वप्रसंगात्कारणात्मा स्थितिरिति चेत् किं कारणमेवावस्थितं
तामित्यर्थः। कार्यमपीति वा। पूर्वस्मिन्नंतःकरणाभावस्तदवस्थितत्वस्थानो न विशेषः तस्मात्कार्यसंस्का

विवर॰ रविशिष्टशक्तिमत्कारणात्कस्यावश्यम्भावापत्तिः अतो नांतःकरणमवच्छेदकमस्तितस्मात्तन्नाविद्यासाम
४० र्थ्यवच्छिन्नविभागसिद्धौ नातिरेककल्पकावकाशो जीवस्य ब्रह्मणः प्रविद्याविद्यापूर्वमेवविभागमपेक्षणकल्पकत्वेन॥
कल्पकस्यातिरेके कल्पतिरेकस्यापि विभागपुरःसरत्वप्रतीतेर्नचैवं भेदानोपि धर्मिसत्तियोगे भावो भेदेनोपर
ज्यते कल्पकस्याद्भेदद्धल्पे धर्मवदरेकधीनोपि जीवब्रह्मविभागस्तस्मिन्नुपरज्यते जीवाद्ब्रह्मणोतिरेक इतिवद
विद्यायामपि तुल्यमेतत्। निरंशान्याकाशांशसिभावेन भेदः संभवति। तस्मादविद्यैव भेदाध्यासनिमित्तमिति
। नन्वविद्या किंसंबंधिनी भेदनिमित्तं। ननु दर्पणादिद्रव्यं वा किंसंबंधि बिंबप्रतिबिंबभेदनिमित्तं सुखमा
त्रसंबंधी चेत्। इहापि विस्तत्पमात्रसंबंधिज्ञानं तत्र जीवब्रह्मव्यवहारभेदं प्रवर्तयतिकथ्यंपुनः स्वरूप
मात्रसंबंधिनो ज्ञानस्य ब्रह्मस्वरूपं परिहृत्य जीवभागैकपक्षपातितेति। दर्पणादेरपि सुखाकाशभेदहेतु
तया सुखादिसंसर्गिणोपि बिंबाकाशे परिहृत्य प्रतिबिंबघटाकाशादिपक्षपातित्ववदतिवदामः। ननु किं ४०
माश्रयेयमविद्या न तावदंतःकरणविशिष्टस्वरूपाश्रया प्रमाणाभावात्॥ नन्वहमज्ञ इतिप्रतिभास एव

विशिष्टाश्रयत्वे प्रमाणं नाहमनुभवामीत्यनुभवस्यापि चैतन्यप्रकाशस्य विशिष्टाश्रयत्वप्रसंगात्। ननु य
थाऽयोदहनौ निरवयवत्वायसोरेकाग्निसंबंधात्परस्परसंबंधावभासः तथानुभवांतःकरणयोरेकात्मसंबं
धावभासः तथानुभवांतःकरणयोरेकात्मसंबंधात्तथावभासो नांतःकरणस्यानुभवाश्रयत्वादिति चेद्
एवमज्ञानांतःकरणयोरेकात्मसंबंधादहमज्ञ इत्यवभासो नांतःकरणस्याज्ञानसंबंधादिति चेत्स्यपती
तरन्यथासिद्धेः परस्परसंबंधकल्पनायोगादात्मन्यविद्यासंबंधस्य श्रुतिशतेष्वपि संप्रतिपन्नत्वाच्च। अथ स्वरूपमा
नाश्रयत्वानुपपत्तेर्विशिष्टाश्रयत्वं कल्प्यत इति चेत्। न विशिष्टस्वरूपसंबंधस्याविद्यामात्रत्वाज्जडस्याज्ञाना
श्रयत्वे भ्रांतिसंज्ञानयोरपि तदाश्रयत्वप्रसंगात्। ननु स्वरूपेऽपि अज्ञानोपपत्तिस्तुल्या। सत्यं अनुपपन्नं ह्या
श्रयत्वकल्पनाद्वनुरं संप्रति पत्र स्वरूपाश्रयत्वोपादाने मोक्षानुपपत्त्या संबंधिन एव बंधाश्रयत्वादुक्तकश्चि
दंतःकरणस्यैवाज्ञानमिति जल्पति स वक्तव्यः किमात्मा सदा सर्वज्ञः। किंचिज्ज्ञो वेति। किंचिज्ज्ञत्वे तु कदाचि
त्किंचिज्जानातीति विषयानवबोधस्यैवात्मनो दर्शितः। अथात्र गृहाण मिथ्याज्ञानयोरात्माश्रयत्वेऽपि भ

वस्या ३

वरूपाज्ञानमंतःकरणाश्रयमिति। किंतदज्ञानादन्यद्वेदज्ञानं का वा कामलादीनामप्यज्ञानत्वान्नवि
वादः। अथाज्ञानविरोधीति न भिन्नाश्रययोर्ज्ञानाज्ञानयोरेकविषययोरपि विरोधित्वादर्शनात्करणाश्र
यमज्ञानं कर्त्राश्रयज्ञानेन न विरुध्यत इति चेन्न। प्रमाणाभावात्। उरूपांतरस्थघुसेवनदीपेनांतःकरणेन
नीयमानेन करणस्थलेन न ब्रिमित्तकमनुमानेपि तदीयांतःकरणाज्ञाननिवृत्त्यदर्शनाच्च। तन्निमित्तदो
षस्याकाचादिवत्करणाश्रयमज्ञानमिति चेन्न। वस्तुगतादावपि प्रसंगात्सादित्वात्तिघामनार्थज्ञानाश्रय
त्वानुपपत्तेरिति चेत्। अतः करणेपि तुल्यं सत्कार्यवादाश्रयणान्नसाधेतःकारणमिति चेत्। चक्षुरादा
वपि तुल्यं। अतो न तदनाद्यज्ञानाश्रयमिति। अन्तःनिहारादिशरीरेष्वपि अज्ञानानामग्रहणवतो चेतनाना
मेवाहतत्वाभिधानान्नांतःकरणाश्रयमज्ञानं। किंतु चेतनाश्रयमित्यलमिति विस्तरेण। तदेतदाह। विद्याव
छिन्नानं तज्जीवेति न्यायः प्रदर्शितः। श्रुतिश्चान्याप्यनुष्णा कर्मतरं बश्रुवनीहारेणाप्रावृता जल्पाः इति व्यवधा
यकमज्ञानं दर्शयति विभेदजनकेऽज्ञाने नाशमात्यंतिकं गते आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यति

इति स्मृतिः ननु ब्रह्मव्यतिरिक्तमानादिवस्तु नास्तीति तत्राह । तथा च स्थितिरिति । अतः प्रपञ्चसंहारः स्पष्टा
र्थः । स्वयंप्रकाशस्याविद्याश्रयत्वमुपपन्नमित्युक्तं । मिदानीं प्रकाशमानस्याविद्याविषयभावो नोपपद्य
त इत्याक्षिपति । नन्विति । प्रमाणविरोध इति । नन्वत्र दुरुक्तमर्थं न ज्ञानामीति प्रतिभासमानमेवाज्ञानस्यावृत्त
कं अवभासते ननु तत्र विशेषाकारस्यानवगतस्याच्छादकता नूनं च भासमानस्यावर्त्तकत्वात्प्रति
भासानुपपत्तेः नन्वेवं भासमानस्यापि तद्भावर्त्तकत्वमनुपपन्नमेव न ह्यज्ञानसंबंधस्य प्रतिभासमान
शरीरत्वादनुपपन्ने रलंकारन्यायात्प्रतिभासस्तु विद्यत एव नन्वत्र कथं प्रतीयमानस्याविद्याविषयत्वानुपपत्ति
रित्याक्षिपति । किं तत्प्रमाणमिति निरंशस्येति परिहारः संविदभेदोऽपरोक्षप्रकाशमानता नामाशरीरात
भेदस्य स्वयंज्योतिषात्मप्रकाशेनाभिन्नस्तत्त्वेनापरोक्ष एवं तथापि न प्रकाशत इति सिद्धान्ती परिहरति
ननु भोक्तुरिति । ननु न भोक्तृत्वादिः स्पष्टार्थः । यदर्थज्ञानमेवाभेदज्ञानमतोऽहं[illegible] मित्यात्मपदार्थस्य
ज्ञानमेव भेदप्रपञ्चमिति मीमांसकंमन्यस्योदयनिरासः । कथं च न भोक्तेति संसर्गाध्यासो हि भेदानवगम

विवर॰
४२ नि मित्तं इति सर्वं क्षमा समिति परिहरति। ननु स्थोऽहमिति पदार्थप्रत्यक्षे गौणभेदेऽपि प्रत्यक्षे सामानाधिक
रण्यं गौणावभासनमिति चोदयित्वा परिहरति॥ ननु गौणत्वस्याऽऽदिनाऽहं गौणवादी नन्वहमित्यदीति।
न प्रत्यक्षावभासं बाधितं आगमानुमानाभ्यामेव व्यतिरेकोऽवगम्यतामिति। नेत्याह आगमानुमानयोरपीति।
ननु मिथ्यात्वात्प्रत्यक्षावभासस्याद्वितीयावभासस्यैव तत्र प्रामाण्यं वा घऽनिवोदयति। मिथ्यात्वात्तस्ये
ति यत्रा विचारप्रभृतिः सर्वमेव प्रत्यक्षावभासमथ्यनुमानादिनाऽऽदिति बाधितमुच्छिन्नव्यवहारं भवति। न
न तथा भवतु यत्र पुनर्विचारपदवीमुपारूढयोर्ज्ञानयोर्बलाबलविनिर्णयाबाधनिश्चयः तत्रानुमाना दि
ना दिना प्रत्यक्षस्य मिथ्यात्वसिद्धिरिति मत्वाऽहङ्कारस्याहं दित्सानात्मत्वप्रतः प्राक्तनेन ग्रन्थेन स्व
भार्थो ग्रन्थः। किं प्रत्यर्थतो व्यतिरिक्तात्मविषयोऽहङ्कारस्तद्व्यतिरेकेण वा प्रतिभासते। प्रत्यर्थतश्चेत्तत्राहाऽऽय
द्यपि देहादिव्यतिरिक्त इति व्यतिरेकप्रतिभासप्रवाध्यासविरोधितत्वासामानाधिकरण्यस्य गौणत्वमा ४२
वहति न तत्र्यथैमात्रमिति भावः ननु सामान्येनाऽगृहीतस्याविशेषाग्रहणादन्यसंसर्गावभासो भवत्वा

त्मानुविशेषरूपेणागृहीतः कथं तत्राध्यासस्तत्राह दृश्यमानेति। अपृथक्प्रतिभासत्वादहंप्रत्ययो विविक्ता
त्मविषय इति। यौक्तिको अयं च नैरेकांत इति परिहरति। न तत्स्तत्सद्भाव इति। यौक्तिकज्ञानसहकृतेनाहंप्रत्य
यस्तेनात्मनि विविक्ते प्रतिपन्नेऽपि च नः सामानाधिकरण्यं गौरोऽहमेकत्वसामान्यात् सर्वमपि तज्ज्ञो गौरोऽहमेवमभिप्रे
त्याह। जिज्ञासोत्तरकालं तु हीति विचारेणापि नाहंप्रत्ययस्य व्यतिरिक्तात्मविषयत्वमापादितं किं तु सर्वं
दारूपमात्रविषयोऽहंप्रत्ययो यौक्तिकज्ञानलब्धस्तु व्यतिरेको दृश्यास इति भेदः तस्तस्यानन्तु संधाने सर्वदेव
दृश्यस एवेति परिहरति। तदुक्तम् इति तत्रापि नाध्यास इति बोधमनुभवविरोध इति परिहारः अकारस्य व्य
तिरेकेऽपि स्वादेर्व्यतिरेकाद्ध्यास इति वा दृश्यति नन्वनुभव इति अन्यतरव्यतिरेके द्वयोरेकत्वाद्यद।
स्येतरेतरव्यतिरेकः सिध्यतीति नेति। ननु महत्त्वेन दीर्घ इ जातमित्यादि विरोधपरिहारो स्पष्टोऽपि किं च विवेकानं
तरमध्यासोऽहंप्रत्ययमात्रेण विरुद्धं तत्कल्प्यते किं वा यौक्तिकाज्ञानेनलावदहंप्रत्ययमात्रेणेत्याह
तथाह्यहंप्रत्ययस्येत्यादिना नन्तु पूर्वमात्ममात्रविषयोऽपि युक्तिज्ञानसंनिधानाद्व्यतिरिक्तविषयोऽहंप्रत्य

यद्यतीति तत्राह। अतो युक्त्या विषयविवेचनेपीति न हि स्वप्नत्वज्ञानं ज्ञानांतरसंनिधानात्स्वविषयादधिकवि
षयं भवतीति भावः। विचारजन्यज्ञानस्यानुसंधानादनुसंधानेपि परोक्षत्वान्नापरोक्षाध्यासः प्रागवस्था
तोभिद्यत इत्युपसंहरन्नाह नोत्पद्यत इति। ननु प्रत्यक्षे देहात्मैक्याध्यासे किमनैक्यप्रत्ययमपबाध्य व्यतिरेके
प्रमाणमुक्तमिति उच्यते पूर्वोक्तिसहितागमानुमानाहंप्रत्ययोः द्विचंद्रबाधवदैकात्म्यव्यतिरेकः सिध्यती
त्युक्तं भवति। तदेवं स्वयं ज्योतिष इति दृष्टांतानुवादेन दार्ष्टांतिककथनपरो ग्रंथः स्पष्टार्थः। स्वयंप्रका
शत्वेप्यविद्ययाऽगृह्यमाणविशेषत्वादात्मनोधिष्ठानत्वोपपत्तिकथनेन परत्वप्रसंगमापद्य निलक्षणं दर्श
दर्शितः कारणेनेत्यपेक्षितं पाश्वसासिवैतन्यप्रमाणातत्कृता विद्याकारणदोषो लब्धो संस्कारमि
दानीं लभ्यतप्रज्ञानादित्याशंक्याह। नन्वध्यस्यमानाधिष्ठानविषयं कारणत्रितयं तत्र्यमेकमेव ज्ञानं वक्त
व्यं। तदभावान्नाध्यास इत्याशंक्याह। पृथक्भोक्तृविषयस्वतु भवफलाभावादित्यात्मचैतन्यस्यैवात्माना ४३
त्मसंसंभेदावभासिस्वरूपेणाजन्यत्वेपि विशिष्टविषयोपरक्ताकारेणाजन्यत्वेऽभ्रांतित्वाच्च विषयिसो

रेकस्मिन्नप्यर्थे संभेदावभासः संभवतीति कारणत्रितयजन्यमात्मनएवात्मावभासि ज्ञानमध्यासस्य सिद्ध

इति॥ ॥कथं पुनरित्यादिभाष्यस्य तात्पर्यमाह॥ कोयमध्यासो नामेति किंदृशोऽस्येति। पृष्टमेवानेना।

।त्तिक्षमपि मयेतत्फभयचैवकारापिशब्दोपर्योक्तव्यो। अथास्य मानेन्द्रियविज्ञानविषयत्वमेवाधिष्ठानस्य

दृष्टं इह तदभावान्नाध्याससंभव इत्याक्षेपपर्यंथार्थः। तत्रैकस्मिन्विज्ञाने तयोः संभिन्नतयावभासएवाप

ह्यते विषयतयावभास इति विशेषणायोगादिति मन्वानः परिहरति। न तावदयमेकांतेनाविषय इ

त्यस्मात्स्यापयशब्देनाध्यविषयं ज्ञानमुक्तमिति मन्वानः प्रबोदयति। ननु विषयिण इत्येकस्यापरत्वदर्श

नक्रियायामेकस्यैव कर्तृस्थाने तदेव तद्विपरीतकर्मकारकस्थानेवावस्थानमनुपपन्नमिति भावोऽस्त

तदंशाभ्यां नद्वावइतिनेत्याह। तत्कथमेकस्येति। तत्र सर्वतो विप्लुतस्यस्य संवित्प्रकाशस्याकाशवि

शेषाभिव्यक्तिनिमित्तदर्पणादिवदात्मचैतन्यस्यस्य सविकल्पकतया स्फुटीकरणाय व्यवहारनिमित्तं भा

स इदमात्मन्यध्यस्तमंतःकरणमस्मत्प्रत्यय इत्याह। अस्मत्प्रत्ययत्वाभिमतोऽहंकार इति नवि

विवर॰
४४

दहं जानामितिवदध्यस्तत्वेहमितिद्वैरूप्यावभासोवक्तव्यइत्यतआह। सत्वेदमतिरमित्ययोदहतीति
दाहकत्वविशिष्टस्याग्नेरयसश्चद्वैरूप्यावभासवदहमित्युपलभ्यइत्युपलब्धत्वविशिष्टस्यात्मनोऽहंकार
णास्यवास्येवद्वैरूप्यावभासोसाक्षरणाक्रियोपरक्तमात्मादिद्वयमेवकस्यंचनरविशिष्टमवभासतइ
तिभावस्तुविशेमास्पदरूपेणापरिणामितदागमापायदृष्टृरूपेणाहंकारविषयादिष्वप्यत्वेन
न्यरूपेणाहमितिव्याख्यातरूपेणैवसर्वलोकसाक्षिकंद्वैरूप्यमित्याह। सर्वलोकसाक्षिकइतिन्व
विषयसंविदाश्रयत्वमात्मनस्तेनाहंजानामीतिसंविदाश्रयकोटिनिविष्टतयात्र अहंकारस्यावभा
सः संभवतीतिपूर्वोबादिनंसिद्धांती चोदयति। कथमितिअयःपिंडव्यतिरेकेणावह्नेर्दहनक्रियाश्र
यत्वदर्शनवदहंव्यतिरेकेणात्मनोज्ञानक्रियादर्शनादहमपवात्मत्वमि। फत्तरेणग्रंथेनप्रतिपादय ४४
ति। तत्रसांख्यात्रविदात्मन्यंतःकरणेविदाकारस्वतिविंवावभासस्तथा विवाविवांतस्वरः सरुप्रतिविं
×अयपत्वेनावभासमानोहंकारः। कथमितरमंशस्यादितिवोदयति॥ ननु किमत्रवक्तव्यमितिनन्वयोदहतीत्यादावयःपिंडादिवदकर्त्रेन×
×पिदर्शनक्रियाश्रय ५४

नच्चैवमादर्पणे मुखप्रतिबिंबवदिति बिंबभूतमात्मानमनुमिमतो नैयायिकवैशेषिकाश्चेच्छादयो
गुणाः पृथिव्यादिमहाभूतद्रव्यव्यतिरिक्तस्यैव द्रव्यस्य विशेषगुणा हीनत्वात्परिशेषादिच्छादिगुण
वद्द्रव्यमन्यदेवात्मेत्यनुमिमतो तथा संवेदनेषु विषयाकारप्रतिबिंबावभासस्तथा बिंबविना सं
निधानं पुनः स्मरणे तस्मिंस्तदवभासत्वात्तद्दर्पणे स्फटिकागतमुखरक्तत्वादिति नित्यमनुमेया विष
या इति सौत्रांतिकाः कल्पयंति। तान्प्रत्याह। प्रमातृप्रमेयप्रमितयस्तावत्परोक्षा इति। यदि सांख्या
यः प्रत्यक्षसिद्धस्यैवात्मनोऽनुमानान्निस्फुटीकरणार्थानीति मन्येरंस्तदा न कश्चिद्विरोधः। यदि नि
त्यानुमेयमात्मानमितीच्छेयुस्तदा विषयवदस्मिन्नपि परोक्षावभासविरोधः। सौत्रांतिकस्यापि यदि वि
षयानुमानज्ञाने साक्षाद्विषया एवावभासेरन्प्रत्यक्षेऽप्यवभासंतां कस्तत्रापराधः। सोऽप्यनुमा
नज्ञाने विषयस्यैवावभासनादनैकांतिको हेतुः। तदेवमनुमानज्ञानेऽपि बिंबभूतविषयावभास
ः प्रतिज्ञातार्थस्याविबंधकः सर्वस्याप्रतिभासादनुमानानुदयः स्यादपरोक्षव्यवहारयोग्यविषया

विवर॰ ४५

वभासविरुद्धत्वानुमानमिति।अत्रविज्ञानवादिनस्तुविज्ञानाभेदनिमित्तएवविषयस्यापरोक्षाव
भासइत्याहुः।तन्निराकरोति।प्रमेयंकर्मत्वेनापरोक्षमितीदंपश्यामीत्यनुमानमिति।अत्रविज्ञान
वादिनस्तुविज्ञानाभेदनिमित्तएवविषयस्यापरोक्षभावाविज्ञानाभेदादेवापरोक्षमवभासतेबहि
र्घटस्यापिरजतादेरापरोक्ष्यात्तदपिज्ञानमितिचेन्नारजतवद्घटाभावप्रसंगात्तस्मादव्यवधानेन
संविद्रूपाधिष्ठितापरोक्षता।विषयस्येतितत्रा(मा)त्ममनःसंयोगजन्यत्वस्यहेतोरपरोक्षत्वमितिवार्त्तिककार
न्यायवैशेषिकानुसारिणःकल्पयंति।प्रमितिस्त्वात्मनिसंयुक्तसमवायनिमित्तज्ञानांतरादपरो
क्षेतिन्यायवैशेषिकोपमेयगताप्रमितिःसंयुक्तसमवायाद्विज्ञानांतरेणापरोक्षेतिवार्त्तिककारीया
स्तान्प्रत्याह।प्रमात्रप्रमितीभिन्नरपरोक्षेएवकेवलमिति।तन्नावदातमविषयंप्रत्यक्षंज्ञानांतरंम
नोजन्यमितिप्रमाणमस्तिसतिमनस्यात्मदर्शनात्।असतित्वबहुशुकेऽदर्शनादन्वयव्यतिरे
कोपमाणमितिचेन्न।विषयानुभवेनैवान्यथासिद्धेर्विषयानुभवसंबंधादेवविषयवदात्मसिद्धावा ४५
त्मर

त्मनिद्राबांतरं परिकल्प्य मनसोऽन्वयव्यतिरेककल्पनायोगात्तस्माद्विषयत्वमंतरेण।त्मापरोक्ष
एव। नवसंयुक्तसमवायादात्मनि विषये वानुभवस्य ज्ञानांतरविषयतयाऽपरोक्षत्वाभावात्स्वस्य वर्त्त
मानविषयापेक्षित्वेन युगपत्फलद्वयावस्थानप्रसंगात्। संयुक्तसंबंधादनुभवावभासे तद्वत्परि
माणरसादीनां वर्तनेनैव ज्ञानेनापरोक्षत्वाप्रसंगात्। अनुभवस्य वस्तुस्वतत्त्वायां प्रकाशव्यतिरेकाद
र्शनाद्वज्ञानांतरागम्यतासिद्धिः नवात्मव्यापाराद्विषयेऽनुभवफलजन्मसंभवति। सर्वगतस्य कु
ड्यादिवत्परिस्पंदाभावात्परिणामफलस्य च घटादिवत् क्रियैकाश्रयत्वेवानुभवस्य मयेदं विदितमि
ति संबंधावभासः स्यात्। विज्ञानक्रियानुमानं चनस्यादनुभवस्यात्मसंबंधाभावात्। तस्मान्नद्वयोः
कर्मतयापरोक्षमानत्वमुभयोः स्वयंप्रकाशत्वकल्पनान्युक्ता अनंतरस्य स्वयंप्रकाशत्वेऽप्यात्मेव
स्वयंप्रकाश इति नेत्याह। प्रमितिरनुभव इति। अर्थवाहानोपादानोपेक्षाः प्रमाणफलमिति केचित्।
तत्राह। प्रमितिरनुभव इति। नहि हानादीनामपि नरेन व्यभिचारिणां मानफलता युक्ता। अव्यभिचा

विवर॰ रिणपनुभवे सतीत्यर्थः। ननु संवेदनमेवार्थसारूप्येण प्रमाणं प्रमीयतेऽनेनार्थ इति करणत्वेनार्थो
४६ पलब्धौ तन्नात्तदेव प्रमाणफलमिति सौगतमतमनुसारिण सिद्धान्तयति। प्रमाणान्तरेति। प्रमान्तरा
पारम्पर्येण इन्द्रियसंनिकर्षएवेति प्रामाण्याकरणत्वमहमिदं ज्ञानामीति। ननु स्वात्मानात्मविषयानुभवो
भेदेन प्रत्यक्षसिद्धाविति तेन्याह। तत्राहमिदं जानामीति। ननु यदवभासते तज्ज्ञानकर्मतयैवावभास
ते इति विषयेषु नियमादात्माप्यवभासते चेत्कर्मतयैवानाश्रयमात्रतयेति चोदयति। तत्राह। तत्रा
ननु नार्थविषयानुभवानि भिन्न इति। ननु प्रत्यक्षज्ञानस्य विषयजन्यत्वात्कारकतापि विषयस्याव
कल्प्या। तत्र कथमेकस्यां क्रियायामेकस्यैव कर्तृत्वेन कर्मत्वेन च विरुद्धरूपद्वयान्वयः। कर्तुश्च
गुणभावात्। कर्मणश्च प्राधान्यादिकस्यैकस्य द्वयं वैरूप्यं च संगच्छेतेति। तत्राह। तस्मिंश्च शब्दमरूप
त्वेनेति। तत्रात्मा मानसप्रत्यक्षमनात्मस्य स्वरूपेणादात्मवायोगाद्विशेष्यांशस्य निरंशत्वात्तत्र कर्तृक
र्मत्वस्थितिं परिहरति। येनैतद्युक्तमिति विरचयत्स्वरूपाय प्रकार्यद्वयपरिणामायोगाच्चेत्याह। अ ४६

परिणामित्वादिति किंच । ग्राहकरूपस्यापि विषयता[?]। सिद्धिरस्ति वा न वा न चेत्स्वयंप्रकाशत्वसंवि
दाश्रयत्वसिद्धेरनभ्युपगमादसिद्धिरेव तत्राह । प्रमेयस्यैवेति तस्मात्संविद्बलादेव नित्यसिद्धेः संवि
दाश्रयपक्षपातित्वादहमः । सिद्धे नेदमंशोऽहंकारोऽन्यप्रसंहरति । तस्मान्नीलादिज्ञानफलमिति अ
हंकारस्यात्मव्यतिरिक्तत्वं साधयित्वमात्मनः स्वयंप्रकाशत्वसाधनाय विकल्पयति । तत्रेदं भवानि
ति । उत सोऽप्यनुभवोपीत्यर्थः । तत्रात्मा विश्वभावव्यस्तुभवो जडप्रकाश इति । पक्षो नोपपद्यत इत्याह । न
गवदिति । नन्वप्रकाशमानमेव प्रमाणफलं चक्षुरादिवद्विषयमवभासयेदिति । कुतो विश्वस्यानव
भासो न विषयप्रकाशकत्वेनेन चक्षुषः प्रकाशकत्वात्संविद्बलक्षणायां वेदनं तत्स्वयमर्थप्रकाशनं
नप्रकाशांतरहेतुरस्तश्च चक्षुरादिवैलक्षण्यात्प्रदीपवद्वभासमान एव तु भवोऽर्थप्रकाशयति । न
च प्रदीपालोकस्याप्यर्थानुभवजनने नैव चक्षुरादिवदर्थस्य प्रकाशकत्वात् किंतु चक्षुष एव तथा हि ज्ञानप्रका
शत्वाज्ज्ञानप्रकाशत्वाज्ज्ञानविरोधिनोऽन्यदेवालोकप्रकाशत्वं तमो विशेषितया प्रसिद्धं तदन्यव

विवर॰ धनिनालोकेन क्रियते। न तदुभयं करोतीति चेत्तु रज्ञानाच्छादनालोकाभावात्। तस्मादनुभवः सजातीयप्र
४७ काशांतरापेक्षः प्रकाशमानएव विषयप्रकाशादिव्यवहारनिमित्तं भवितुमर्हत्यव्यवधानेन विषयप्रका
शादिव्यवहारनिमित्तत्वात् प्रदीपालोकवत्। न च स्वप्रकाशस्य सजातीयप्रकाशेन प्रदीपस्यालोकेनेव
स्फुटस्य प्रकाश्यता स्वयमेव प्रकाशगुणत्वात्तद्विषयज्ञानप्रकाशं जनयति चेत्स्फुरिति चेत्तथापि वि
जातीयज्ञानेनैव प्रदीपस्य प्रकाश्यत्वेन समानजातीयालोकापेक्षा। तस्मादव्यवहितप्रदीपस्ये
वानुभवस्याप्यप्रकाशमानस्य प्रदीपप्रकाशप्रसंगवद्विषयस्यानवभासप्रसंग इति॥ ॥ननु प्रमातृ
चैतन्यमेव जडानुभवबलादात्मानं विषयं वावभासयतीति चोदयन्ति मैवं। प्रमातृचैतन्य इति। तत्र य
दि चैतन्यस्य विषयोपरागहेतुरस्वभूतः परोक्षपगतबुद्धिपरिणाममपदिश्यते तद्घटते चिदात्मप्र
काशस्य तु जडानुभवाधीनतानुपपत्तेरित्याह। तन्न स्वयं चैतन्यप्रभवोपि सन्निति। चेतयति क्रिया ४७
पि पूर्वानुभवफलवज्जडरूपानुभवफलं चैतन्यस्यापि प्रदीपस्थानीयत्वाच्चेतयति क्रिया न वस्थेति

दर्शयति। किं वक्ष्यमाणफले नेति। उभयथा चैतन्यस्वभावपक्षे विभुरूपद्वयवत्त्वात्मनोऽन्याधीनसिद्धिताना
पि संविदामसंबंधावगमइत्याह। द्वितीयेपि कल्प इति। ननु विभुणामपि विभुरूपांतरसंवेदनं न विभुरूपांत
रसंवेदनं न अणुरूपांतरस्य स्वयंप्रकाशत्वं तथा त्वात्मचैतन्यस्य अणुणापि न स्वयंप्रकाशइति शंकते पृथुचै
तन्यस्वभावत्वेपीति परिहरति। विशेषे हेतुर्वाच्य इति अनुभवोपि न हि न स्वयंप्रकाशः स्यात् पुरुषां
तरसंवेदनवत् अणुत्वव्याख्यानान्नेति चेत्। आत्मन्यपि न समानमिति भावः किं चेति स्पष्टोर्थः। अस्तु तर्हि
जडात्मनः स्वयंप्रकाशानुभवाश्रयतया सिद्धिरिति नेत्याह। तृतीयेपीत्ययमर्थः संवेदनं नाम गुणो द्र
व्यं कर्म वा भवति। कर्मत्वे प्रकाशत्वफलयोरनुपपत्तिः द्रव्यत्वेप्यणुमध्यमानंतपरिमाणानामन्यपरि
माणत्वे विषयोपि तावन्मात्रावभासः स्यात्। न हि खद्योतप्रकाशमात्रसंसृष्टस्य घटस्य सर्वात्मनाव
भासः महापरिमाणत्वे तदाश्रयतयात्मनोपि सर्वार्थावभासप्रसंगः। मध्यमपरिमाणत्वे सावयवत्वे नाव
यवापरतंत्रत्वादात्मपरतंत्रता न स्यात्। गुणत्वे सत्यात्मैव प्रकाशगुणइति प्रदीपवदात्मा स्वयंप्रकाश

विवर श्रयः स्यात्। स्वप्रकाशगुणः स्वाश्रयोपाधित्वेन ज्ञायते। प्रकाशगुणत्वादात्मन्यव्यभिचाराद्वादित्यादि
४८ प्रकाशगुणवदिति। आत्मैव स्वयंप्रकाश इति। तदेतदाह। अनिच्छतोऽप्यात्मैवेति प्रकाश इति। ननु
मध्यमपरिमाणमेव च स्वाश्रयं फलमस्त्वात्मपरिमाणतो घटस्येव स्वगतमेतत्तेनेति नेत्याह। नन
दितिरिक्तत्वात्। विषयफलसद्भावस्य इति। प्रदीपेन प्रकाशितमिति वन्मया युगतमित्यनुभावादात्मैव वि
तिप्रकाशोऽन्यथा काष्ठेन प्रकाशितमिति बहुप्रकारप्रसंगादिति भावः। प्रमाणानां रूपे त्वयाष्टद्धतिक
थमिति। संवेदनस्याभेदावभासस्यानन्यत्वादनुभवाधीनसिद्धिकस्य च विषयवदनात्मत्वादेकः स्यादप्या
त्मैवानुभव इत्याह। तस्मात् द्विस्वभाव एवेति। ननु स्वयंप्रकाशमानात्मचैतन्यस्य प्रमाणजन्यत्वेऽनुभव
इति। सामान्यविशेषभेदकल्पनागौरवादात्मैक एवानुभव इत्याह। सर्वानुभवानुगतत्वेनेति। स्वगतभे
दप्रतिभासस्यानन्यत्वमेव प्रपंचयति। नन्वनीलानुभव इति। ननु नीलसंवित्स्थितिकाले पीतसंवि
दोऽभावात्॥ स्थितिविनाशादृष्टो धर्मभेदं कल्पयन् इति बोधघटकं सर्वपरिहरति। ननु विनष्टावि ४८

त्यादिनाननुसाधनसंनिधानादुत्करस्य संवेदनस्यजातत्वात्अविदूस्ययोगपद्यायोगादिनघापूर्वीसंवि
दितिचेत्।नेतरेतराश्रयादित्याह।सावकाशत्वाच्चइतिसिद्धस्यैवसंवेदनस्यविषयोपरागनिमित्तंसाधन
मिति।कल्पनंलब्धे।यःविषयोपरक्तस्यविज्ञानस्यसाधनत्वकल्पनादितिभावः।सत्यापिसंविदांस्वगत
भेदेऽप्रतिसादृश्यात्ज्वालायामिवपर्येपाधिमंतरेणाभेदानभासतेइतिसुगतकल्पयंति।तन्निरा
करोति।एतेनातिसादृश्यादितिकिंच।ज्ञानांतरगमत्वेभेदस्यातिसादृश्याद्विनैषभेदभ्रमजन्मस्या
त्।स्वयंप्रकाशस्यनुभेदस्यप्रकाशात्।भिन्नइतिप्रकाशमानत्वेवक्तुत्वेन्याह।नहिचित्प्रकाशस्येति।नव
यथाजीवस्येतिस्पष्टोऽर्थः।एकत्वेनपुष्कलप्रकाशस्याप्यविद्याप्रतिबंधेप्रमाणेषुक्रमिहत्वप्रतिबद्ध
पुष्कलकारणाभावाद्भेदप्रकाशेनभवितव्यमित्याह।अभिहितंतत्रेतिननुसंविदःसादृश्यप्रतीतिवद्भे
दावभासःस्यादपिप्रकाशाद्विषयत्वात्।ज्वालावदित्यनुमातुंशक्यतइत्यत्राह।नहिसामान्यतोदृ
ष्टमितिपूर्वापरैकरूपानुभवोभेदस्यचप्रकाशेनभवितव्यमित्यनुभवस्तुकीकथंपुनरात्मचैतन्य

विव· स्य विषयानुभवत्वमिति तदाह। तस्माविहभाव एवेति। ननु स्वयंप्रकाशमानात्मचैतन्य विषयानु
५७ भवत्वेपि विषयानुभवमेव निमित्ती कृत्याहमिति इष्टपरामर्शात्मैवाहंकारः संवृत्त इति चोदय
ति बाढमत एवेति। इष्टरूपेणापरामर्श स्वविषयानुभवो हि निमित्तमन्यथा दृष्ट्रादिविभागस्यानाधि
न्मात्रावभासस्यादिति भावः। मेवं कृष्णुसावात्मन्यवभासमानेप्यनवभासमानत्वादिति व्यतिरेकपर
शोनेन परिहरति सत्यमेवमिति ननु विषयानुभवनिमित्तो दृष्टरूपावभासो हमुल्लेखनस्य इहि
नेरुषुषे कथमस्य प्रसंग इति चोदयति। कथमिति। विषयानुभवनिमित्तो विषयावभासः स्यात् ज
डत्वात्। न तन्निमित्त श्चिदात्मपरामर्श इति परिहरति नीलानुषंगो यस्त्वेतन्य स्येति। ननु सुषुप्ते दृ
ष्टरूपाभावे कथमहमिति द्रूपपरामर्शः नेत्याह। तत्रापि यदि नामेति दृष्टत्वं सपतियोगिरूपं संवेद
नस्यार्थो ना। मैवाहंकारः स्यादिति भावः ननु परामर्शस्य दृष्टरूपं भोक्तृत्वमेव सुषुप्तावनुभूयत ५७
इति चोदयति। नन्वहमिति नाहंकारस्य बाधा निष्प्रतियोगिकात्ममात्रत्वात्फ्फ पगमादिति परिह

रति। नैतत्सारमिति। ननु स्वरूपमपि विषयानुभवादेवाहमिति व्यपदेशमिति। नेत्याह। नैतळ्कयमि
ति। ततश्च विषयोपरक्तत्वप्रतियोगिकस्वभावस्याहंकारस्यात्मत्वं सुषुप्ताद्यनुभवविरुद्धमिदमाप
त्स्यत इत्याह। ततश्च विषयोपराग इति। आत्मनस्तु सर्वात्मकत्वात्। परागव्यावर्तना अहमुपरा
गादेवव्यावृत्त्यैवभासत इत्यर्थः॥ भवत्वेवेत्यादिस्पष्टार्थं। यथा पूर्वस्मिन्दिने अहमित्यभिमन्य
मान एवास्मेवमनुभूतेस्मृतिनियमाभावेपि स्मर्यमाणात्ममात्रत्वादहंकारस्य सुषुप्तौपि स्मृतिः
स्यादित्यर्थः। आहंकारस्येति भासस्यानित्यत्वेतत्स्वरूपस्यापि विनाशात्तज्जन्यसंस्कारप्रसूतास्मृति
रनुपपन्नेति बोद्धव्यमिति। अविनाशिनः संस्काराभावादिति। परिहारोऽस्यास्तनोपीति। ननु सिद्धान्ते
पि कथमहंकारस्य स्मृतिस्तदवभासिसाक्षिचैतन्यस्यानित्यत्वात्॥ ॥ उच्यते॥ ॥ अहंवृत्त्यव
च्छिन्नमेवांतःकरणं चैतन्यस्य विषयभावमापद्यते। तद्वृत्तिसंस्कारजन्यस्मरणावच्छिन्नमंतःक
रणं पुनः स्मृत्यनुभवावच्छेदकमिति स्मरणोपपत्तिः। ननु सुषुप्त्यावनुभूयं चैतन्यस्य विषयजन्यत्व।

सुखस्य स्वस्याश्रयपक्षपातित्वमया अहं सुखीत्युल्लेखादस्यैव सुखस्याहमनुभवइत्यापत्तेनन्वस्यैवसु
खमहइति। ननुसुखमनुभवामीत्येतस्य विषयतानुपपत्त्यात्र विषयानुभवनिमित्तएवतत्राप्यहमनुल्लेख
स्यादितिचेत्याह। नात्मनोन्यस्येति सप्तम्यन्तोपादिरस्यपष्टार्थः॥ छ॥ ननु स्वावमर्शस्यसुख
सुखाद्युल्लेखवत्त्वेपरिशिष्टस्यकथंविशेषेदुःखाभावविषयत्वयोपचारःकल्प्यते।शाद्देहिज्ञानेल
क्षणास्यानुमन्तसुखावमर्शोनलक्षणामर्हतीतिवोद्यति।कथमितिसुखस्यसुखाभावाद्दुःखाभा
वस्यलक्षणस्यसंप्रतिपन्नत्वादितिपरिहरतिस्वप्नेनावच्छिन्नादिना।ननुपरामर्शसामर्थ्यादेवसुखम
वसुखंकल्प्यताम्।मितिनेत्याह।यदिपुनःसुखमसुखमितिविशेषणइतिविषयविशेषोपरेक्षात
येवेत्यर्थः।दुःखाभावएवपरामर्शसामर्थ्यविषयइत्यत्रलिंगमाह।व्यपदेशोपीति।ननुसुखा
नुभवस्यापिलिंगमस्तिप्रसन्नेंद्रियत्वादिति।तत्राहसहसुखेनसुखेनोत्थितस्येतितदर्थादितिस्पष्टार्थः
उत्तरोबोधपरिहारग्रंथोस्पष्टार्थौ।तस्मात्सुखमहमभोत्कृतयाप्यहमुल्लेखेनसमर्थनमितिनन्व

नुभूतेऽपि न स्मृतिनियमः स्वप्नमात्मन्यनुस्मर्यमाणे तावन्मात्रस्याहंकारस्याहमित्येव स्मृतिनि
यमः स्यादित्यत्रोक्तं ननु दुःखाभावो विद्यमानोऽपि नानुभवितुं शक्यते प्रतियोगिस्मरणाभावात् भव
तु सुखमेव स्वरूपानंदानुभवः ननु तदापि सुखमविद्यावृतं न प्रकाशमर्हतीति नाना वृत्तसाक्षिचैतन्य
सुखांशस्य प्रकाशोपपत्तेः जागरणे तर्हि किमिति नावभासते भासत एव परप्रेमास्पदत्वलक्षणं
सुखं तीव्रवायुविक्षिप्तप्रदीपप्रभावन्मिथ्याज्ञानविक्षिप्तत्वान्न स्पष्टमवभासते सुषुप्तौ तु तदभावा
दधिकं स्पष्टमिति । ननु स्थितस्य दुःखाभावस्यार्थापत्त्यागमस्य यद्यप्यनुभूतत्वे परामर्शोऽपि विद्यते स कथं
प्रतियोगिज्ञानाभावादननुभूतः परामृश्यते उच्यते । अननुभूतमेव सुखवत्सुप्तोत्थितस्यानुस्मर्यमा
णं न तत्र विरोधि दुःखाभावमर्थापत्त्यागमयत्यनुभूतत्वे सुखं नास्ति दुःखमित्यनेन दुःखाभावो न
तु स्मर्यते । किं तु प्रमीयत इत्येवं सुप्तोत्थितस्य ज्ञानाभावपरामर्शोऽपि ज्ञानं विरोधिनो ज्ञानस्यानु
भूतस्यास्मर्यमाणस्यानुपपत्त्यैव प्रमीयते नानुस्मर्यते । ननु जागरणेऽप्यनुभूयमानमज्ञानं क

थंज्ञानविरोधिस्यान्नावस्थाविशेषविशेषविशिष्टस्याज्ञानस्यसुषुप्तेनुभवात्तस्यचजागरणे
पिघटादिज्ञानविरोधितादर्शनात्पटाग्रमसमयेनन्वस्मर्यमाणत्वादेवज्ञानंसुषुप्तेज्ञानाभावो
नुमीयतांनातिदृष्टत्वज्ञानानामपिस्मर्यमाणत्वात्। प्रातर्गजीभावोपीदानीमनुस्मर्यमाणाद्ज्ञा
ज्ञविरोधियदार्थाद्वर्थापत्त्यानुमीयतेऽनन्तविषयस्मृत्युदयमात्रात्कल्पनाभिचारित्वात्। तस्माद्वि
शिष्टाज्ञानसुखाद्यनुभवानुपपत्तिगम्योऽज्ञानाभावदुःखाभावावितिमंतव्यं। नन्वज्ञानसुखाद्यनुभव
योःसाक्षिचैतन्यस्याविनाशिनःसंस्काराभावेकथमुत्थितस्यतयोरनुस्मरणंस्यादुच्यते। अ
ज्ञानगतचैतन्याभासजन्मोधित्वादज्ञानसुखसाक्षिविकल्पानुभवस्याज्ञानावस्थाभेदेनचै
तन्याभासानांभिन्नत्वात्तद्विनाशसंस्कारजस्मरणमज्ञानसुखसाक्षिचैतन्याकारमज्ञानविशि
ष्टात्माश्रयमेवसंभाव्यते। नांतःकरणाश्रयमितिसर्वथापिसुषुप्तेऽज्ञानसुखाद्यनुभवसंभवादसंब ५१
द्धमिदंटीकाकारणोक्तमितिमन्तव्यंपरमतमाश्रित्यैतदुक्तंनस्वमतमितिनदोषः स्वयंप्रकाशत्वाहंका

रभेदं चोक्त्वा चोपसंहरति तदेवं नायं नीलादिप्रत्ययादिति। अहंकारभेदस्याप्युपलक्षणार्थं यस्मादा
त्मनो ऽहंकारे भिन्नत्वे तस्मादागमस्थूलं भाष्यं वक्ष्यमाणमुपपन्नमित्याह। तस्माद्ब्रह्मविदामिति। कश्चासा
वागमः स एवाधस्तात्तत्संप्रदिष्टादिति भ्रमारभ्यत्वस्या॥ सर्वात्मत्वमभिधायाथातोऽहंकारादेश इति
तस्यापि सर्वात्मत्वमुक्त्वाथात आत्मादेश इत्यात्मानमहंकाराद्भेदेन निर्दिशतीति तत्तु जीवब्रह्मणोस
र्वात्मत्वप्रपादकशोयथा एकत्वमभिधार्थ्यैवमहंकारस्याप्यात्मैकत्वासिद्ध्यर्थोऽयमुपदेशः स्यात्तन्न॥ द्वयोः
सार्वात्म्यायोगात् तत्र युक्तं भेदेन प्रतिपन्नयोर्जीवब्रह्मणोरेकत्वसिद्ध्यर्थस्तदुपदेशोऽहंकारस्य॥ तु स्व
मेकत्वप्रतिपत्तेः पृथगुपदेशो भेदसिद्ध्यर्थ इति गम्यते ब्रह्मणः परोक्षत्वस्य प्रत्यक्त्वसिद्धयेऽहमात्मब्रह्मु
पदिश्यत नस्तद्वदसेनमुख्यात्मत्वमुपदिशतीत्यर्थः। महाभूतान्यहंकार इत्यत्र स्मृतिः। नन्वयम
हंकारः किमुपादानः किंनिमित्तः किंस्वरूपः किंप्रमाणकः किंकार्य इति। पृष्टे तेन भवतीति व
वोढिते तत्फलस्यत इत्यादिपरिहाराः। अयमित्याद्युपादानसंकीर्तनमविद्याकर्मश्रद्धाप्रज्ञेति भ्रान्तिक

विवर॰ र्मःपूर्वानुभवसंस्काराज्जन्यर्थः। नस्यादितिनिमित्तकारणनिर्देशः। विज्ञानक्रियाशक्तिद्वयाश्र
५२ यइतिस्वरूपंदर्शयति। कर्तृत्वभोक्तृत्वेतिकार्यप्रदर्शनं कूटस्थ्ययेतन्यइतिप्रमाणोपन्यासः। यदं
भेदादित्यात्मतिसर्वंतदारोपनिमित्तकार्यान्तरमाह। किमितितर्हिसुषुप्तेनस्यादित्यतआह। स्वसु
षुप्तइति। अज्ञानकार्येलिंगशरीरस्यविलयोहिसुषुप्तिरित्यर्थः। ननुसतिप्राणेक्रियात्मनिकथम
हंकारस्यक्रियाशक्तेरपिविलयः॥ उच्यते॥ नाहंकारमात्रत्वंप्राणस्योच्यते। किंतुप्राणस्यहृद्य
कृतः पंचधाव्यापारहेतोरहंकारस्यक्रियाशक्तिरस्तीत्येतावदुच्यते। मनोधीनतादर्शनात्
।प्राणलक्षणाक्रियाशक्त्यंशंवाविहाय्यविज्ञानशक्त्यंशस्यलयः कल्पितांसांशत्वादंतःकरणस्य
स्वप्नादिवद्दृष्टिसृष्टिमात्रित्यवासुप्तपुरुषदृष्ट्याभिप्रायेणसर्वस्यतत्रलयोदर्शितः सुप्तप्राणशरी
रादिदर्शनस्यपुरुषांतरविभ्रमत्वादिति॥ ॥अत्रसांख्यामतंपतेयद्यचेतनंमायादिशब्दवाच्यमं ५२
तःकरणाद्युपादानमिष्टंस्यात्तर्हितदहंकारनिर्भासेसाक्षिणितच्छक्तित्वेनवानदाश्रयत्वेनवा
दा२

तदधिष्ठितत्वेनवानंतर्भूतमेवप्रधानंस्यात्तेनैवधर्मलक्षणावस्थाभेदैस्त्रिविधपरिणामतइतितत्र
धर्मपरिणामोनाममहदादिकस्यकार्यरूपेणावस्थानंतस्यैवधर्मस्यातीतानागतवर्तमानलक्ष
णापरिणामस्तथाहिकार्यमनागतलक्षणापन्नंतत्परित्यज्यवर्त्तमानलक्षणमापद्यतेपुनस्तत्परि
त्यज्यातीतलक्षणापन्नंभवतिपुनस्तदेवागामिलक्षणापन्नंभवतीति अवस्थापरिणामस्त्वतीत
मतीततरमतीततममनागतमनागततरमनागततममितितत्रैववर्त्तमानचिरंतनाद्यवस्थापत्तिरतो
नचैतन्नोपादानेनकृत्यमितिनेत्याहनचैकंतव्यमितिकृतइतितदाह।तथासत्यपाकृताहंकृति
संसर्गइति।अहमितिकृतिःकरणंयस्मिन्नसासाहंकृतिरयमाशयश्चेतनस्यानात्मसंभेदाव
भासोनाख्यातिर्नाप्यन्यथाख्यातिर्नापियात्मख्यातिरितिउक्तमिदानींचैतन्यस्यैवस्वाविद्ययाकिंव
र्तमानमिथ्यावस्तुसंभेदावभासलक्षणाविनिर्वचनीयख्यातिरभ्युपगमेचेतनाचेतनयोरत्यंत
विविक्तावभासएवस्यात्तसंभेदावभासइत्यत्रनेयाप्यकामन्यंतेआत्मेंद्रियविषयेषुसम्बन्धितेषुकल्प

